SKBK USA

# ગુરુકૃપાલહરી
# Gujarati

Guru KripaLahari Authored by :
Kalluri Venkata Subrahmanya Dikshitulu

Transliterated by: SKBK USA



[Type here]

# ગુરુકૃપાલહરી
## ૧ મઙ્ગલતરઙ્ગઃ

શ્રીવિદ્યાભરણં ત્રયીમયમહાપદ્માટવીચારણં
કલ્યાણાચરણં સદાશિવસદાનન્દામૃતાપૂરણમ્ |
વિઘ્નાનાનાં વિનિવારણં સુકવિહૃત્પઙ્કેરુહપ્રેરણં
હૈરમ્બં ચરણં વ્રજામિ શરણં વાગ્વૈદુષીકારણમ્ || || ૧ ||

આદિક્ષાન્ત સમસ્ત વર્ણનિચય વ્યઞ્જત્તનૂવલ્લરીં
આવિઘ્નેશ્વરપાદુકાન્ત ગુરુમન્ત્રા પુરી સુન્દરીમ્ |
આબ્રહ્માનુભવાણિમાદિસકલૈશ્વર્યક્રિયાચાતુરીં
આપાદાગ્ર શિરસ્સુધારસઝરીં વન્દે ગિરામીશ્વરીમ્ || ||૨||

શિશિરકર કિશોર સ્મેર કોટીરકોટીં-
વશિજનહૃદયાન્તઃ કૌસુમારામવાટીમ્ |
નિજશિશુવદનાબ્જ ન્યસ્ત કર્પૂરવીટીં
પરમશિવવધૂટી મીં નુમઃ કામકોટીમ્ || ||૩||

બૈરાગીતિ તપઃ પ્રસિદ્ધમહસાં સાહિત્યસીમાજુષાં
ગાયત્રી પરદેવતા પરશિવબ્રહ્મૈક્યમાસેદુષામ્ |
મદ્ભાષા પરમપ્રસન્નકવિતા યોગામૃત શ્રીપ્રપા-
કલ્પાનામનુસન્દધામ્યનુપદં વિદ્યાગુરૂણાં પદમ્ || ||૪||

પ્રાસાદં પદમાશ્રયે શિવમયં જ્યોતિર્મયં ચિન્મયં
યન્નૈરન્તર ભાવના વિધિબલાત્તત્તન્મયટ્પ્રત્યયે |

વ્યાક્ષિપ્તે ગુણગુણ્યભેદમધુરા તત્વૈકતાના મતિઃ
સ્યાચ્છાન્તિસ્સહનાવવત્વિતિ ચ સા શ્રૌતી ભવેત્સાર્થકા || ||૫||

## ૨. સ્વરૂપતરઙ્ગઃ

આમ્બા સામ્બાયિતં તેજઃ વાણી વીણાયિતાં ગિરમ્ |
પદ્મા સદ્માયિતં પાદં શ્રીગુરો શ્શરણં ભજે || ||૬||

વાણી યન્મુખતસ્સ્વયં કલયતે વીણાં પુનર્યત્પદે
લક્ષ્મીર્યત્ર શિવોદય સ્સુકવિતાસૃષ્ટિશ્ચ યત્રાચ્યુતમ્ |
રક્ષાકાર્ય મતો જગદ્વિલયનં યત્રાઽદ્ભુતં શામ્ભવં
વન્દે તત્કિમપિ ત્રિશક્તિક મહો ત્રૈપૂરુષં ગૌરવમ્ || ||૭||

રક્તાન્ત સ્પૃહણીય દીર્ઘનયનં સ્વાકુઞ્ચિત ભ્રૂલતં
હાસસ્મેર મુદારફાલ ફલકં સ્ફૂર્જત્કપોલારુણમ્ |
શ્રીકર્ણં સુનસં સુચારુરદનં પૂર્ણેન્દુબિમ્બાનનં
વન્દે શ્રીગુરુમૂર્તિમિન્દુમકુટં શ્રીકામપીઠાધિપમ્ || ||૮||

શ્રીકેલીસદનાયિતં પદયુગં યાનં મદેભાનુગં
પાદાગ્રં જિતકૂર્મપૃષ્ઠમમલં શ્લક્ષ્ણઞ્ચ જઙ્ઘાયુગમ્ |
આજાનુ પ્રવિલમ્બિ બાહુયુગલં વામં પુનર્વામિનં
યસ્ય સ્વર્ણ સવર્ણમન્વહમહં વન્દે ગુરોર્વિગ્રહમ્ || ||૯||

પદં સંવિલ્લક્ષ્મ્યાસ્પદ મમૃત નિષ્યન્દિ વદનં
કલાવૈદગ્ધ્યાનાં સદનમભવચ્છઙ્કર ગુરોઃ |
યદાધારાત્તત્તન્મધુર મકરન્દામૃતઝરી
પરીવાહા દ્દૃપ્તં કવિમધુપ બૃન્દારક કુલમ્ || ||૧૦||

[Type here]

આરુણ્યં સકલાઙ્ગકે નયનયોરન્તે ચ મન્દસ્મિતે
શૌકલ્યં યસ્ય તુ પીતતા કરતલે દેવી હરિદ્રાર્ચનાત્ |
શ્રીરુદ્રાક્ષ કિરીટકોટિ પટલે સૌધાકર શ્રીકલા
શાટ્યાઙ્ગૈરિકમર્ચયે શબલિતં વર્ણૈરવર્ણં ગુરુમ્ || ||૧૧||

શ્રૃઙ્ગારં મહસીન્દ્રિયાર્થવિજયે વીરં સ્વભક્તાર્ભકે-
વ્યક્તં સત્કરુણં વિભૂતિકલયા ત્વામદ્ભુતં બાલકૈઃ |
હાસ્યં ચાથ ભયાનકં ભયવિધે રક્ષસ્સુ બીભત્સકં
રૌદ્રં દૃશ્યલયે સ્વયં નવરસં શાન્તં ભવન્તં નુમઃ || ||૧૨||

કાશી મૂર્તિરવન્તિકા ગુરુકૃપા બ્રહ્મણ્યયોધ્યામતિઃ
માયા સાપ્યણિમાદિ ભૂતિરમલા કાઞ્ચી વિહારસ્થલી |
વ્યક્તં દ્વારવતીચ વાગપિ ગુરોરદ્વૈતભાવોદયે
સૂક્તિશ્ર્શ્રીમધુરેતિ મોક્ષનગરીશ્રૃઙ્ગારમીડે ગુરુમ્ || ||૧૩||

સ્મિતે મુક્તાં, વજ્રં મનસિ નિશિતે, ગારુડમણિં
વિષત્યાગે, પદ્મં પદિ, શુભમતૌ પુષ્યક મપિ, |
તૃણૌન્મુખ્યે નીલં, વપુષિ ચ પ્રવાલં, મસૃણતા-
સ્થિતૌ ગોમેધં, ત્વાં ભવમિહવિદૂરે ત્વિષિ, ભજે || ||૧૪||

મન્દારં યશસા સ્વભક્ત જગત સ્સન્તાનકં નન્દને
કલ્પં શ્રીમખભોગયોગકલનેનાશીતલેનાત્મના |
સમ્ભાવ્યં હરિચન્દનં સુમનસા તં પારિજાતં ભુવિ
પ્રાપ્તં સર્વસુપર્વભૂરુહ વરાકારં ગુરું સંશ્રયે || ||૧૫||

શ્રુત્યન્તશ્રી કુવલયવનોન્મીલને રાજબિમ્બં

[Type here]

બ્રહ્મબ્રાહ્મીમૃદુલનલિની ખેલને રાજહંસમ્ |
શ્રી ચક્રાન્તર્વલયિતભુવાં પાલને રાજરાજં
વન્દેઽદ્વૈતસ્વદમથમહાભિક્ષુકં રાજમૌલિમ્ || ||૧૬||

ભાષ્યૈર્બ્રહ્મવિવેચનાય મિલિત સ્વાન્તેવસ દ્વૈદવિ-
દ્વર્યાણાં હૃદયે સ્મિતાઙ્કુર રુચા મૌનેન મુષ્ણન્ તમઃ |
કાષાયં પરિવેષમણ્ડલમિવ બ્રાહ્મ્યા વસાન શિશ્રય-
સ્તદ્જ્યોતિઃ કિમપિ પ્રબોધયતિ યજ્જ્યોતિસ્તદે વાશ્રયે || ||૧૭||

કલ્યાણાવસધં સતામવભૃથં જ્ઞાનાધ્વરે વૈબુધં
ધામાદ્યં દલિતક્ષુથં શ્રુતિરથ પ્રસ્થાનઘંટાપથમ્ |
ભેદજ્ઞાન ગિરીન્દ્ર ભેદન સમુત્સેધં સુરેન્દ્રાયુધં
સેવે શ્રીગુરુબોધમાગમ મહાસૌધાગ્ર ગુપ્તાર્થદમ્ || ||૧૮||

દ્વૈતાદ્વૈત વિશિષ્ટવાદકુશલૈ રદ્વૈતભક્ત્યર્ચિતં
સારાસાર વિચારચારુમનસાં સંખ્યાવતાં વલ્લભમ્ |
સ્વાપ્તાનાપ્ત સમસ્તજીવિસદયં જ્ઞાન શ્રિયા માશ્રયં
વન્દેઽદ્વૈતગુરું સમસ્ત જગતાં ધીશઙ્કરં શઙ્કરમ્ || ||૧૯||

ઓઙ્કાર શ્શરણં સતા મનુભવશ્રીરાતિથેયં મહા-
વિદ્યા સોપનિષત્કળા ચ ગૃહિણી પુત્રસ્સ્વ આત્મા વિભુઃ |
સર્વસ્વં ત્વણિમાદિકં પરતરે ચેતોરતિ સ્સારતિ-
ર્ગાર્હસ્થ્યં ત્રિજગત્કુટુમ્બિન ઇદં ચિત્રં પરિવ્રાજિનઃ || || ૨૦ ||

શ્રીમચ્છન્દ્રકિશોર શેખર ગુરો રત્રાવતારા ચ્છ્રિયા
નામ્નાઽસૌ જયવત્સરો જયતિ તન્માસોઽપિ સન્ માધવઃ |
સા કૃષ્ણપ્રતિપત્તિથિર્વિજયતે સર્વાદિમો વાસરઃ

મઙ્ગળ્યં મૃદુભઞ્ચ મૈત્રમભવલ્લગ્નંચ પઞ્ચાનનઃ ||||૨૧||

જયોદયેનાઽથ જિતેન્દ્રિયત્વાત્
જયાભિનન્ધ્યેન જયેન્દ્રભાસા |
દયાભિરામેણ ધિયાપ્યનેન
શ્રિયા ચ સર્વજ્ઞપદં વિજિગ્યે || ||૨૨||

## ૩. અર્ચાતરઙ્ગઃ

સાયં પ્રાત સ્સન્ધ્યયો સ્સન્નિધાને
ભાવદ્રવ્યૈરર્ચિતા માનસાબ્જે |
સ્વૌન્મુખ્યં મે કલ્પયન્ત્યાત્મભૂત્યા
યેડહં તેષાં કિઙ્કરશ્શઙ્કરાણામ્ || ||૨૩||

પાદે પદ્મં હૃદયકમલે ચારુકલ્હાર પુષ્પં
કણ્ઠે શઙ્ખં નયન યુગળે નવ્યનીલોત્પલે દ્વે |
કુન્દં દન્તે હ્યધર પટલે પાટલં ચમ્પકં ચ
ઘ્રાણે મલ્લીં સ્મિતજુષિમુખે શ્રીદળં શ્રીલલાટે || ||૨૪||

ભૂસાન્નિધ્યે સુમશરધનુઃ પુષ્પમાત્રં કટાક્ષે
સાહસ્રારં તદનુ પરમં નાગલિઙતં તદગ્રે |
ગાઙ્ગેયાબ્જં શિરસિ મકુટે મઞ્જુલં ચન્દ્રકાન્તમ્
વિન્યસ્યૈવં ગુરુવર શિવારાધન પ્રક્રિયાયામ્ || ||૨૫||

દ્રવ્યાદ્વૈત પ્રસૃત સુમનોમુદ્રયા ન્યાસભઙ્ગ્યા
મારાધ્યારાધન પરિકરાભેદભાવં ભજન્તી |
યોગારૂઢસ્થિતિ પરિણતાદ્વૈતસિધ્ધિં ગતાસ્મી
ત્યન્તઃ ખેલ ત્યનુભવરસે રાજહંસી મતિર્મે || ||૨૬||

બિમ્બ સ્ત્વં પ્રતિબિમ્બ એષ ભવદાલમ્બઃ કદમ્બો ગિરા-
મવ્યક્તં મણિદર્પણે મનસિ મે વ્યક્તં સ્વરૂપં તવ |
યેન પ્રસ્ફુરતિ પ્રભો | પ્રતિપદં તત્સ્વાર્થ માભૂષયત્
શ્રી દેવ્યા ઉપચાર ચારુરચના ચાતુર્યધુર્યોત્સવે || ||૨૭||

સ્વસ્તિ, સ્વસ્તિક મા દધાતુ કદલીદ્રાક્ષાફલે વાક્પરી-
 પાકં મોક્ષ મપૂર્વમેવ કુરુતા દુર્વારુકં બન્ધનાત્ |
ચૂત સ્તાપશમં સમાધિ મતુલં નિર્બીજિકા ગોસ્તની
દધાન્મે ગુરુભુક્તશેષમમૃતં તત્તત્ફલં સ્વોચિતમ્ |||૨૮||

યદ્યત્કર્મ કરોમિ તત્તદખિલં શમ્ભો | તવારાધનં
ભૂયાદિત્યનુસંહિતં સુકૃતિભિઃ કિં વાપ્યકર્તુ ર્મમ |
કિં વક્તવ્યમથાપ્યભાવમપિ યદ્બ્રૂયુઃ પદાર્થં બુધાઃ
તદ્લક્ષ્યે યદકર્મ મે તદપિ તે હ્યારાધનં સ્યાદિતિ || ||૨૯||

ક્લીબે બ્રહ્મણિ મન્મન શ્રીમતિ શક્ત્યાં સ્ત્રિયામેકતાં
 ગન્તું સઙ્તતમેવ પુંસિ ગિરિશે સાક્ષાદ્ગુરૌ નોભવેત્, |
 નાદ્વૈતં ગુરુણા સહેતિચ વચસ્તેનેરિતં તદ્ગતા -
વાત્મૈવાડલ મતો ભજે શિવગુરું સ્વાત્માન મેવાત્મના || || ૩૦ ||

નિરઙ્કુશં સંવિવશં મનો મે
ન પારયેત્સુન્દર તેડનુભૂત્યૈ |
મનોહર સ્તત્સકલં સબીજં
હર પ્રભો યેન મમેષ્ટસિદ્ધિઃ || ||૩૧||

અલ્પાયુષ્ટ મપણ્ડિતૈરિહસુખ વ્યાસક્તધીવિભ્રમૈ-
સ્તાપગ્રસ્તજનૈઃ પ્રચિન્તિતમહો મૃત્યુઞ્જય ત્વદ્ધિયામ્ |
નોભીતિ ર્નમૃતિ ર્જનિ ર્નચ રુજા તેષાં સ્મરારે સુધા-
રોચિશ્શેખર | તે જયન્તિ નિતરાં દીર્ઘાયુષા વર્ચસા || ||૩૨||

# ૪. પ્રસાદતરઙ્ગઃ

શ્રી નારાયણભટ્ટપાદગદિતં નારાયણીયં સુધા-
સ્વાદં માતૃવચોભિ રાકલયતા લબ્ધા પરોક્ષં ગુરોઃ |
શ્રીમદ્વાયુપુરેશ્વરસ્ય કરુણા તત્પાદપદ્મોદ્ભવા
ધારાસાપ્યમૃતસ્ય તે રસયતિ સ્તોત્રે મમેદં વચઃ || ||૩૩||

પરાપશ્યન્ત્યાદિ સ્ફુરતિ સકલં વાગ્વિલસનં
તુરીયં તત્રૈકં પશુનિગદિતં બાહ્યવિદિતમ્ |
સ્વયં ગૃહ્ણન્ મૌની ગુરુરથપરાં ભેદવિધુરામ્
અભિજ્ઞો નઃ પુષ્ણાસ્યનુભવપરાં બોધમધુરામ્ || ||૩૪||

મહિમ્નઃ પારમ્યં ચુળુકિતપયોધે ર્યદિ મમ-
પ્રભોઃ કારુણ્યાબ્ધેરહમપિ કળાં સ્વાદુ રસયે |
મતિ મન્થાનાદ્રેર્યદિ મમ તુલાં યાત્યવિકલં
સુધાપાનં કુર્યાં તવ વચનદુગ્ધાબ્ધિ મથનાત્ || ||૩૫||

ચકોરી દૃષ્ટિસ્સ્યાદ્યદિ મમ ભવન્મુગ્ધમધુર -
સ્મિતજ્યોત્સ્ના પાનસ્ફુટરસિકતા મઞ્ચતિ વિભો |
મરાલી પ્રાણાનાં યદિ ભવતિ વૃત્તિ ર્મમ ભવત્-
પદાબ્જશ્રીડોલોત્સવરસ મહોત્સાહ મયતે || ||૩૬||

અલિ ર્ન્યાસીડચ્ચેન્મે શ્રુતિરપિ ભવત્સૂક્તિ સુમનો
રસાસ્વાદસ્વાદુસ્થિરતરગતિં યાત્યવિરતમ્ |
મયૂરો ભાવશ્ચેન્મમ ભવદપાઙ્ગતોદયદયા-
પયોદચ્છાયાયાં તરલતરલાયાં નટતિ ચ || ||૩૭||

વાઙ્મે ન પ્રસર ત્યસજ્જનવૃથાવાર્તારિતા તે સ્તુતા
વઞ્ચ ત્યેવ ન તે પદં પશુવિલાસોદ્વલ્ગનં મન્મનઃ |
સ્વાધીનં ન વપુઃ કદ ન્નવિવશં ત્વત્પાદસેવાવિધા-
વ પ્યેવં ગુરુદેવ તે મયિ તવ પ્રેમાવધિં લઙ્ઘતે || ||૩૮||

છન્દોઽલઙ્કૃતિનૈગમાર્થવિધુરં તર્કા પ્રતિષ્ઠં પરં
ભક્તિજ્ઞાનવિદૂર મૌપનિષદે તત્વેઽપ્યપારંગમમ્ |
શબ્દબ્રહ્મણિ મૂકમપ્યકુશલં સારસ્વતોપાસને
કા વા તે કરુણાગુરો કિમપિ માં વાચાલય ત્યદ્ભુતમ્ || ||૩૯||

ન ભાવનેષ્ટિ ર્નપદાર્થરિષ્ટિઃ
ન પાકદૃષ્ટિર્નચ ધાતુપુષ્ટિઃ |
અથાઽપિ મે શ્રીગુરુકાવ્યસૃષ્ટેઃ
સ્રષ્ટુ સ્સુભાવાર્થરસપ્રવૃષ્ટિઃ || ||૪૦||

કૃપા રૂપં સ્વીયં પ્રકટયિતુકામો મયિ પશા-
વિહૈવં શ્રુત્યન્તસ્ફુરદરુણરેખં તવ પદમ્ |
પદં વાચાં ધત્સે પ્રતિપદસુધાદોહમધુરં
વૃષાત્માઽહં રૌમિ સ્વરમયમુપૈતુ સ્વરસતામ્ || ||૪૧||

સદા માતુર્વાચં પુનરનુવદન્ મુગ્ધમધુરં
શિશુર્માત્રા સાકં જનયતિ મુદં સર્વજગતામ્ |
દદત્ ત્વદ્વાચં તે હ્યનિશ મુપદાં ત્વત્કૃતપદાં
તવાનુગ્રાહ્યોઽયં, કવિરપિ મુદાં પાત્રતિ વિદામ્ ||||૪૨||

કાલેઽસ્મિન્ કવિતા યશોવ્યસનિભિશ્ચૌર્યાત્પદાહર્તૃભિઃ
કાવ્યં તત્કરકોપલેન રચિતં પાત્રં ન ચાન્દ્રોપલમ્ |

[Type here]

સ્યન્દા તત્ક્ષણમેવ નશ્યતિ યતસ્તત્રાહિતો યો રસઃ
સોઽપિસ્યાત્ ક્ષણભઙ્ગુરો ગુરુધિયાં સ્વાદાય નો કલ્પતે || ||૪૩||

આચાર્યસ્મિત ચન્દ્રિકા પ્રસરણા દન્તર્બહિશ્ચિદ્રસ
સ્યન્દિન્યાં કવિતાસુધાકરમણિદ્રોણ્યાં તદેકાત્મકમ્ |
દિવ્યં પાયસ માગલં પ્રપિબતાં પ્રાચાં ઋ ષીણાં કૃપા-
સારં સારતરં તદૌપનિષદં સારસ્વતં જૃમ્ભતે || ||૪૪||

શ્રીપાદૈસ્સ્વયમત્ર મે કૃતિશિશો ર્નામોત્સવઃ કાર્ય ઇ
ત્યુક્તં ક્વાઽપિ મયા તવાઽસ્તિ હૃદયે યત્તન્મમાસ્ત્યસ્તુ તત્ |
નામેત્યૂચુ રિયંતતો ગુરુકૃપાધારાલહ ર્યુચ્યતે
પારમ્યસ્ય ગુરોઃ પદં ચ તદિદં સાર્વજ્ઞ્યસાર્વાત્મ્યયોઃ || ||૪૫||

પાયંપાય મુદારદેશિક કૃપાધારા સુધારા ગિરાં
ગાયંગાય મશેષસદ્ગુરુ યશોગાથા અગાથા શ્રિયા |
ધ્યાયંધ્યાય મનન્તબોધકકૃતા આજ્ઞા ઉપજ્ઞા શ્રુતેઃ
હાયંહાયમબોધમદ્વય સુખોત્સેધં પ્રબોધં વ્રજે || ||૪૬||

પ્રતિવર્ણં પ્રતિ શબ્દ
પ્રતિ વાક્યં તે પ્રતિ પ્રબન્ધમપિ |
પ્રતિપન્મધુરં વિશતિ
પ્રતિમુખમિવ મે મનોમુકુરે || ||૪૭||

પ્રત્યક્ષ કલ્યાણ ભુવે સુનામ્ને
પ્રત્યર્થપીયૂષ દુહે સ્વધામ્ને |
પ્રત્યક્ષર સ્વાદુરસૈક સીમ્ને
ભૂમ્ને નમસ્તે નિગમાગ્રધામ્ને || ||૪૮||

## ૫. અનુભૂતિતરઙ્ગઃ

યસ્યાં તમો વિકલયન્ કલયન્ સ્વદીપ્ત્યા
જ્યોતિસ્સુધાકરમયં તમસઃ પરસ્તાત્ |
વૃદ્ધિં વ્યધાદ્ગુરુરલૌકિક શબ્દસિન્ધોઃ
સાऽऽધાનિશા સ્ફુરતુ યોગદશાऽનિશં મે || ||૪૯||

ઓઙ્કાર મૂર્તિમધિરુહ્ય લતાન્તશય્યાં
પલ્યઙ્કિકાં પરિદધત્ કલહંસ ચિહ્નમ્ |
સ્વર્ણાઙ્કુરાઙ્કુવ મહો નગરોત્સવે ત્વં
નેત્રોત્સવં વ્યરચયઃ કુસુમૈઃ કિરન્ નઃ || ||૫૦||

ગ્રામાન્તરે મદનુજઃ સ્થિત ઈક્ષણાનાં
સાફલ્યદં ક્ષણમિમં કથમદ્ય પશ્યેત્ |
ઇત્યેવમાત્મનિ વિચિન્તયતો મમાગ્રે
પ્રાદર્શયસ્સપદિ તં ત્વમહો સ્વભૂત્યા || ||૫૧||

દૃષ્ટ્વા કૃતાન્ત મપિ તં મયિ ચાપતન્તં
રક્તાક્ષ મીશ | મહિષં ધરણૌ શયાનઃ |
હા ચન્દ્રશેખર | શિવેતિ ગૃણન્ ક્ષણાયુઃ
મૂર્છાં ગતોऽહમથ તત્ર સમાવિરાસીઃ || ||૫૨||

પશ્યલ્લલાટમથ દણ્ડધરં ભવન્તં
પશ્યન્ પુનસ્સપદિ દણ્ડધરશ્ચ ભીતઃ |
પશ્ચાત્પદં નતશિરા અદમદ્યમસ્ય
વાહસ્સમુગ્રગવલોऽમ્બર મુત્પપાત || ||૫૩||

ભાગ્યં ત્વદર્ચનવિધૌ યદિ મે હ્યુપાધિઃ
તિષ્ઠત્વયં સપદિ ગચ્છતુ વાઽન્યથાચેત્ |
ઇત્યુક્તવન્તમથ મામનુભૂતિસારૈઃ
આજીવય સ્સકરુણામૃત હક્પ્રસારૈઃ || ||૫૪||

જન્મજ્વરોપશમનાય મયાર્થિત સ્ત્વં
દૃષ્ટ્વા વપુર્જ્વરિતમાર્તજનૈકબન્ધો |
દત્વાઽમૃતં ચ કૃતવાન્ પરમાં ચિકિત્સાં
તં ત્વાં ભવજ્વરભિષગ્વરમાશ્રયામિ || ||૫૫||

મૂકાય વાચમદદા સ્ત્વમદાઃ સ્તુતૌ તે
મૂકાય મહ્યમપિ સુન્દરદેવવાણીમ્ |
દ્વૈતેતરં બહુ તદા વિવૃતં ત્વયૈતત્
આનન્દતાણ્ડવ વિલાસ મનુસ્મરામિ || ||૫૬||

સંસારપાશનિચયૈરહમસ્મિ બદ્ધો
નેશે ભવન્ત મનુગન્તુ મિતિ બ્રુવન્તમ્ |
મામબ્રવીરહમપિ ત્વયિ રાગબદ્ધો
લોકાન્તરેઽપ્યનુગમિષ્ય ઇતિ પ્રભુસ્ત્વમ્ || ||૫૭||

એકાન્તત સ્સમવધાર્ય મદાર્તવાચં
પ્રસ્થાનયાન મનુ મે વિતરન્ પ્રસાદમ્ |
હાર્દેન વત્સલ રસાર્દ્રવિલોક નેન
ત્વં ચાગ્રહીઃ પ્રિયમુદા હૃદયાર્પણં મે || ||૫૮||

ગઙ્ગામહં સમુપનીય ચ કૃષ્ણવેણીં

ગોદાવરીમથ કવેરસુતાં સદારઃ |
દિવ્યાભિષેચનવિધિં કૃતવાન્ કટાક્ષૈઃ
આસેચય સ્ત્વમપિ નૌ કરુણામૃતૌઘૈઃ || ||૫૯||

શાસ્ત્રૈરગમ્યમિહ મે ગુરુશાસ્ત્રગમ્યં
બ્રહ્મેતિ યદ્વહસિ કિઞ્ચિ દવાદિષં ત્વામ્ |
મૌનં વિધાય નિજબોધરસૈકમાનં
તત્રાઽકરો સ્સદય મે હૃદયં સુધીરમ્ || ||૬૦||

ભ્રષ્ટોઽસ્મ્યહં શ્રુતિપથા ન્નિજવંશવૃધ્દૈઃ
આરાધિતાદિતિરુદન્તમવેક્ષ્ય દીનમ્ |
શિષ્ટં વ્યધાઃ કૃપણવત્સલ | માં ત્વદીય
પાદારવિન્દ કલહંસકુલૈકજુષ્ટમ્ || ||૬૧||

વાગ્લૌકિકી મમ ન ભાતિ તવ સ્તુતા વિ-
ત્યાકર્ણ્ય મદ્વચનમઙ્ગ કૃપાન્તરઙ્ગઃ |
ત્વં મેઽકૃથા શ્શુકવચસ્યથ પૂર્ણસઙ્ખ્યા
સૌન્દર્યસારસફલા મયિ મન્ત્રદીક્ષામ્ || ||૬૨||

ગીર્વાણવૃત્તચયલક્ષણ મન્વપૃચ્છ -
સ્ત્વં માં કદાચિ દધિરુહ્ય મૃગેન્દ્રપીઠમ્ |
ધૃત્વા ચ શેષગિરિનાયકશેષવસ્ત્રં
કૌશેયમેતદુપદેશ ઇહાઽભવન્મે || ||૬૩||

દેવાલયે ત્વદનુશાસનતસ્સલજ્જઃ
પદ્યં હરાવપઠમેકપદેન લુપ્તમ્ |
વેણુઃ ક્વચાભવદિતિ સ્મિતપૂર્વ મુક્ત્વા

તચ્ચાનય સ્સ્મૃતિપથં પદમદ્ભુતં મે ||||૬૪||

કાલોડલ્પ બુદ્ધિશબલઃ પરમાવિભૂતીઃ
દૃષ્ટ્વા ત્વયિ વ્રજતિ ભક્તિમહો નિજાડર્થે |
સ્વલ્પં સમર્પયતિ કામયતે હ્યનલ્પં
ન સ્વં દદાતિ સકલસ્વમપેક્ષતે ચ || ||૬૫||

શ્રીચક્ર વર્તિનમિવાકલયે ભવન્તં
માં ચક્ર વર્તિતનયત્વ મતોડનુયાતિ |
તે નામકામ ઇવ ચાડસ્મ્યબુધોડપ્યકામઃ
સર્વસ્વભૂ સ્ત્વમિહ મે યદભૂ સ્સ્વકીયઃ ||||૬૬||

અસ્ત્યેતદસ્તિ ન મમેત્યનુચિન્તનેડપિ
ભીતોડસ્મિ યન્મમ મન સ્ત્વયિ સન્નિવિષ્ટમ્ |
તત્સ્પન્દનં કિમપિ તત્ત્વયિ તત્ર ભાતિ
તે નાડપ્રયત્નમિહ યામ્યમનસ્કયોગમ્ ||||૬૭||

કદાચિદાપ્તૈઃ પરિવેષ્ટિત સ્ત્વં
કવેરકન્યા રસવીચિકાસુ |
તથાડનુજે શ્રોતરિ ભિક્ષુસૂત્રૈ
ર્વ્યથાઃ પરોક્ષં મમ ભાષ્યશાન્તિમ્ ||||૬૮||

ઉષસ્યદા દર્શનમેકદા મે
કાષાયવાસાઃ કલિતાત્મદણ્ડઃ |
હાસપ્રસન્નં શુભવત્સરાદૌ
ચિત્રં મમૈતન્નજહાતિ ચિત્તમ્ || ||૬૯||

ચિત્રં હ્યાઙ્ગિતક વિભ્રમો ભ્રમહરઃ પ્રાસઙ્ગિતક સ્સ્વાશ્રિતે
રાગશ્ચાખિલ રાગબન્ધનહરઃ કર્માપ્યકર્માસ્પદમ્ |
પ્રજ્ઞા સા પ્યતિલૌકિકી સ્ફુરતિ નઃ પ્રજ્ઞા પ્રભો લૌકિકી
નિષ્ઠા બ્રહ્મણિ મે ગુરો સ્સ્વજનસંરક્ષૈક નિષ્ઠાદ્ભુતમ્ || ||૭૦||

રમ્યં વીક્ષિતમર્થવત્સુમધુરં મન્દસ્મિતં ભાવવત્
હૃદ્યં સ્પન્દનમાધરં સ્વરસવન્મૌનં મહાવાક્યવત્ |
પારોક્ષ્યં હ્યપરોક્ષ વસ્તુસુખવત્તાત્પર્યવદ્દર્શનં
સ્વપ્ને જાગ્રતિ મે ગુરોર્વિલસિતં સર્વાન્તરં બ્રહ્મવત્ || ||૭૧||

ચિત્રં પર્ણશદે પ્રદોષસમયે યસ્સંનિલી યાન્તરે
માતુર્મે ચરણાઙ્ગુલીયક મહો પૂજ્યં હરિષ્ણોર્વ્યથાઃ |
શિક્ષાં માતૃરિરક્ષયા ભગવતેઽસ્મૈ પર્ણશયાય તે
લીલાતાણ્ડવપણ્ડિતાય શ્રુતિસંવેદ્યાય કસ્મૈ નમઃ || ||૭૨||

સર્વા ઽપ્યણિમાદયો હિ વૃણતે ત્વામીશ્વરં ભૂતયો
નાશ્ચર્યં સ્વ મહિમ્ન્યધિષ્ઠિતવતો નાઽવાદરોઽનાદરઃ |
સ્વસ્માન્નિસ્સૃત સપ્તરશ્મિવિભવં દૃષ્ટ્વા સ્વયં જ્યોતિષાં
જ્યોતિ સ્સાઽપિ સહસ્રરશ્મિરયતે કિં કિઞ્ચિ દપ્યદ્ભુતમ્ || ||૭૩||

## ૬. લલિતાતરઙ્ગઃ

બ્રહ્માહુર્હિ નપુંસકં પુરુષ ઇત્યાહુ ભવન્તં પરે
ચિત્રં તદ્વિષમં હિ શાસ્ત્રવચનં તત્ત્વં ગુહાયાં સ્થિતમ્ |
શ્રી માતા ગુરુદેવતે ત્વહ મયે માનં કૃપા પણ્ડિતૈઃ
વાદો યદ્યથ મૌનમેવ શરણં સેવેઽનુભૂ ત્યાત્મનિ || ||૭૪||

સત્ત્વાદિ ત્રિગુણં પ્રધાન મુદિતં વર્ણૈસ્સકારાદિભિઃ
સ્ત્રીશબ્દે ગુણબોધકૈહ્ર્યુપરિ તત્તુર્યસ્વરશ્ચિત્કલા |
ઈકાર શ્ચિદધિષ્ઠિતા પ્રકૃતિરિત્યાખ્યાતિ સા દેવતા
શક્તિ સ્સા જનની સમસ્તજગતાં ત્વામેવ તાં ભાવયે || || ૭૫ ||

કામાક્ષ્યેવ નકાઽપિ મન્દગમના રૂપે હ્યુષો દેવતા
સર્વાઙ્ગીણનવારુણારુણરુચા વાલાપને શારદા |
માતા મામકલાલને મધુમતી વિદ્યા રસાસેચને
ગાયત્રી ગુરુદેવતા નિજશિશુત્રાણે ભવેન્મામિકા || ||૭૬||

સોમા શમ્ભુ વિમોહને મધુરિપોર્ભામા ધનાપાદને
શ્યામા શ્રોત્રિયજીવને પુરરિપો રામા રસાસેચને |
ભીમા દ્વૈતવિભઞ્જને શ્રુતિશિરસ્સીમા સુધીરઞ્જને
સામાંકાઽપ્યનુકમ્પ માકલયતે ધામાઽનુકમ્પાઽદ્ભુતમ્ || ||૭૭||

બ્રાહ્મી બ્રાહ્મમુહૂર્તકે તનુરુચા સર્વારુણા ઋઙ્મયી
રૌદ્રી શુભ્રરુચિ ર્યજુર્મયતનૂ ર્મધ્યાહ્ન કાલે તથા |
કૃષ્ણા સામમયી પુનસ્તદપરા સાયન્તની વૈષ્ણવી
ગાયત્રી ગુરુદેવતા મમ સદા છન્દોમયી દ્યોતતે | ||૭૮||

નૂનં પઞ્ચદશં ભવાન્ તિથિકુલં તન્મૌલિગા ષોડશી
યા સા ત્વં બહિરન્તરઙ્ગવિષયા પર્યાયતો ગોચરા |
રાજસ્યન્તરથાદિમે સુવિશદા પૂર્ણા ચ સત્વાત્મિકા
સ્થાને વાઽન્યતરે તથા સુમલિના દર્શાકૃતિ સ્તામસી || || ૭૯ ||

એવં ભાવનયા ઽનયા તવ જગત્ સ્થિત્યાદિક પ્રક્રિયા
કર્તૃત્વં તદતીત ષોડશકલાકલ્પત્વ મઽતીકૃતં |
સ્યાદિત્યન્તરુપાસ્મહે હિ તમસો યત્તત્પરસ્તાત્પરં
જ્યોતિઃ જ્યૌતિષમણ્ડલાદપિ પરાં ત્વાં તાં કલાં ષોડશીમ્ || ||૮૦||

શ્રીગૌરી કિમુ કાઽપિ કન્નડકલા ત્વં ભૈરવી રઞ્જની
કલ્યાણી શ્રુતિરઞ્જની ત્વમથ સા હંસધ્વનિ વર્ધની |
ધન્યાસિ સ્વરભૂષણી ચ વિજયશ્રી સ્ત્વં મરાલી ગુરુ-
સ્ત્વં સોમાભરણાકૃતિઃ સ્ફુરસિ મે રાગસ્વરૂપા હૃદિ || ||૮૧||

સ્વીયં સ્વાર્થપરં સ્વભાવસકલં સંવર્ધયન્તી કુલં
નિસ્સ્વં પુણ્યજનં સ્વરૂપવિકલં તં વઞ્ચયન્તી મુહુઃ |
કાઞ્ચ્યાં શ્રીતરુણેન્દુશેખરમનસ્સમ્મોહિની મોહિની
મૂર્તિઃ કાઽપ્યતિવેલમત્ર કુરુતે દ્વૈતેતરં વિભ્રમમ્ || ||૮૨||

કૈલાસાઽચલચુમ્બિનીં શ્રુતિશિરઃ કાદમ્બકાદમ્બિનીં
કૈવલ્યામૃતવર્ષિણીં નિજપદધ્યાનૈક સંહર્ષિણીમ્ |
કાવ્યાલાપવિનોદિનીં નિજયશસ્સઽતીત સમ્મોદિનીં
વન્દેઽસ્મન્મતિનન્દિનીં ગુરુકલામાનન્દનિષ્યન્દિનીમ્ || ||૮૩||

રાજ્ઞી ત્વં ગુરુરૂપિણી ત્રિજગતીસામ્રાજ્યલક્ષ્મીઃ શ્રુતિ-
સ્તત્રાજ્ઞે સ્મૃતિરપ્યપારકરુણાવૃષ્ટ્યા ચ તુષ્ટિ પરામ્ |

પુષ્ટિં ચાડપિ તનોષિ તે કરધૃતો દણ્ડસ્તુ મન્ત્રાઞ્ચિતો
મૃત્યોર્વાડપિ ભયઙ્કર સ્સુકુ્તિનાં ક્ષેમઙ્કર સ્ત્યાગિનામ્ || ||૮૪||

માત્રે કુપ્યતિ ડિમ્ભકઃ પ્રતિપદં સ્તન્યાય રુન્ધન્ પદં
ક્ષુદ્જ્ઞા સાડપિ દદાતિ સુષ્ઠુ સમયે તં લાલયન્તી પયઃ |
ઇત્થં શ્રીગુરુદેવતે ત્વયિ મમાપ્યાક્રોશ આત્માર્થકઃ
ત્વન્મે યત્સમયે હિતં કુરુ તદેવાત્યન્તિકં મઙ્ગલમ્ || ||૮૫||

અમ્બ ત્વં કલયસ્યયાચિત મહો યન્મે હિતં તે હિતં
માતસ્ત્વં વિતરસ્ય તર્ક્યમપિમેડશ્રેયોડમૃતં ત્વાં ઋ તમ્ |
દેવિ | ત્વં શ્લથય સ્યચિન્ત્યમપિ મે ચિત્તભ્રમં સમ્ભ્રમમ્
કેયં તે ગુરુદેવતે | મયિ કૃપા મેયં પદં લઙ્ઘતે || ||૮૬||

ભિક્ષાવૃત્ત્યનુશિક્ષણં કૃતવતી બ્રહ્મોપદેશે પુરા
લક્ષ્મી મેંજનની સ્વયં ભુવિ પુનર્જ્ઞાનેન જાતઃ પુનઃ |
ભિક્ષાવન્દન માતનોમિ જગતાં માતુ સ્તવાગ્રે મહા-
ભિક્ષો | કિં વિદધાસ્યતો વિતરમે સાક્ષાત્સ્વરૂપં હિ મે | || ૮૭ ||

શ્રીભોગેશ્વરનામભૂષણવતો લબ્ધા જનિર્મે સ્થિતિઃ
તસ્મા દેવ ગુરોર્મમાદ્વયસુખે સ્યાદ્વા લયો બ્રહ્મણિ |
શક્તિ સ્તત્ર ભવાન્ ગુરુર્ગુરુકૃપા પ્રાથમ્ય પારમ્યયોઃ
હેતુ સ્ત્વા મપુનર્ભવાય જનનીં વન્દે પરાં દેવતામ્ || ||૮૮||

કુમારસ્તેડભૂત્પ્રાગ્જનનિ જગતાં ચ સ્સ જગતાં
કુમાર શ્રી દેવ્યા સ્તવ ચ જનકો લોકજનકઃ |
તવાન્તેવાસી યસ્સ્મરયમનિયન્તા સ જગતાં
તથાન્તેવાસી સન્ જયતિ જનનં મૃત્યુ મપિ ચ ||||૮૯||

નાનાલોકાલોકદક્ષા મલોકાં
નાનાભાવાભાવમૂલા મમૂલામ્
નાનાકલ્પાકલ્પલીલા મલીલાં
નાનારૂપાં ત્વા મરૂપા મુપાસે || ||૯૦||

# ૭. શિવલીલાતરઙ્ગઃ

શક્તિ શ્શમ્ભુ રિતિદ્વિધા નિગદિતં યચ્છેષ શેષ્યાત્મકં
વાગર્થાકૃતિકં પુરાણમિથુનં બિન્દુત્રિકોણાયિતમ્ |
હંસદ્વન્દ્વ મહો વિમર્શ ઇતિ યદ્યચ્ચ પ્રકાશઃ પરઃ
તદ્વન્દે ગુરુમૂર્તિત સ્સમુદિતં ચિત્સામરસ્યં મહઃ || ||૯૧||

ઉત્સઙ્ગે માં શિશુવદકરો દક્ષપૂર્ણાભિવાન્યાઃ
ગૃતાયાં મે હ્યઘટયદહો બાલતારઙ્ગ કેલીમ્ |
ડોલા લીલામકલયદિમાં યસ્ત્રિવેણ્યાં પ્રયાગે
સોઽયં કાશ્યાં શિવ ઇહ ગુરુસ્સન્નિધત્તેઽવ કાઞ્ચ્યામ્ || || ૯૨ ||

આસૃષ્ટેરિયમેવ જીવસરણિર્યાત્માભિમુખ્યેતરા
સુસ્પષ્ટં ચ પરાઞ્ચિ ખાનિ વ્યતૃણધત્તત્સ્વયમ્ભૂ સ્સ્વયમ્ |
ધિગ્જીવાન્ પરમાદ્ભુતાદ્ભુતકૃપાલીલાવતારૈ શિશવે
ત્વય્યેવં ચરતિ પ્રભૌ પ્રસરતિ પ્રીતિર્ન તેષાં ગુરૌ |||૯૩||

સ્તેનાનાં પતયે તુભ્યં મુષ્ણતાં પતયે નમઃ |
તસ્કરાણાં ચ પતયે તમસાં મનસાં ભિયામ્ || ||૯૪||

હરશ્ચ મે હરિશ્ચ મે હ્યુમા ચ મે રમા ચ મે
સકોઽપિમે સુવાક્યમે નકોઽપિ મે ત્વમેવ મે || ||૯૫||

દ્વૈતમિવ કાલકૂટો ગલે ગૃહીત સ્સમસ્તલોકાનાં |
શઙ્કર ભવત્કૃતં તચ્છિવં શિવાલોચનોત્સવં વન્દે || ||૯૬

[Type here]

હાલાહલમપિ કણ્ઠે કર્તુર્જગતાં હિતાય તે ભર્તુઃ |
હર્તુર્દોષં ચાઙ્ગીકર્તું મદ્વાચમીશ કિમસાધ્યમ્ || ||૯૭||

લિઙ્ગં લિઙ્ગં સ્યા ચ્છિવાખ્યાર્થભેદે
સત્વાદીનાં ચ દ્વિવક્ષાભિગમ્યમ્ |
તસ્માત્ સેવેઽપ્રત્યયં સાર્થમેકં
નિસ્ત્રૈગુણ્યં ત્વામલિઙ્ગં શિવેતિ || ||૯૮||

શિવ શિવ શિવ એવં તત્પદાવૃત્તિતો મે
વશિ વપુરથચિત્તં સ્યા ન્નિવૃત્તૌ વચશ્ચ |
પ્રથમમમૃતબીજં યત્પુરાસ્વાદ્ય મન્તે
ભવતિ ભવ ભવન્તં કોહ્યતીયાત્કૃપાયામ્ || || ૯૯ ||

ઉગ્રો વ્યગ્ર સ્ત્વં શિવો લક્ષ્યસે યૈઃ
તે નો જાનન્ત્યગ્રભાવં ગુરો સ્તે |
તદ્જ્ઞાનાર્થં નઃ પ્રદેહિ પ્રભો |
તા મન્તશ્શાન્તાં શામ્ભવીં યોગમુદ્રામ્ || ||૧૦૦||

અર્ધાઽર્થયો બિન્દુવિભિન્નનાદયો-
રપિ સ્વરૂપે પરમાર્થતોઽભિદા |
યત્રાઽદ્ભુતં તન્મિથુનં પુરાતનં
ભજે ગુરુત્વ પ્રતિપન્નગૌરવમ્ || ||૧૦૧||

ઉક્તાર્થભેદાદપિ ચાર્થતઃ પુનઃ
શિવાભિધાને પ્યુભયાર્થસુન્દરમ્ |
પ્રતિસ્ફુર ચ્ચન્દ્રકિશોરશેખરં
શિવાર્થમીડે પરમં શિવાર્થમ્ ||||૧૦૨||

ભયભવયો ર્યવમાત્રવિભેદાત્
ઉભયમિદંભયસ્ય પદં ન |
અભવ ઇહ ત્વભવોઽથ ભવો નઃ
પ્રભુરભયાય તતોઽપ્યભવાય || ||૧૦૩||

ત્યાગયોગસમવેતસમ્મુખં
વિશ્વતોમુખમુપાસ્મહે સુખમ્ |
ભક્તચિત્ત નવનીતતસ્કરં
પશ્યતોહરમુપાશ્રયે હરમ્ || ||૧૦૪||

## ૮. હરિલીલાતરઙ્ગઃ

આવૃત્તે યુગધર્મપાદગણિતૈ ર્લીલાવતારૈઃ પુનઃ
સ્થૈર્યં ચાગમતો ગતં જગદિદં મિથ્યેત્યમિથ્યેતિ વા |
કિં તૈ સ્તર્કવિતર્કકર્કશમતૈ સ્તન્મે જગન્મઙ્ગલં
ધામાઽદ્વૈત મિદં દૃશાં હિ વિષય શ્રી શાઙ્કરં વૈષ્ણવમ્ || ||૧૦૫ ||

દૃશાઽમૃતં સિઞ્ચતિ વૈ પ્રજાસુ
સમાહર ત્યદ્ભુત મિન્દ્રિયાણિ |
રસાતલં ચોદ્ધરતે સ્વશક્ત્યા
સ્વભક્તબાલોત્સવ માતનોતિ || ||૧૦૬||

ત્રિવિક્રમઃ ક્રામતિ ચ ત્રિલોકીં
સ્વ તેજસાઽધઃ કુરુતે પરૌઘમ્ |
મુનીન્દ્રભાવાન્ રમય ત્યશેષાન્
ધિયાં હિ સઙ્કર્ષણતાં પ્રયાતિ || ||૧૦૭||

કરોતિ ગીતોપનિષત્પ્રબોધં
હ્યધર્મનિર્મૂલન માતનોતિ |
દશાવતારાત્મક એવ માસ્તે
ભવાન્ હરિ ર્મે ગુરુરાજમૌલિઃ || ||૧૦૮||

કૃતે શ્વેતાખ્યં ત્વાં પરમતપસં જ્ઞાનમહસં
યુગે ત્રેતાખ્યે વા નિહતકલુષં યજ્ઞપુરુષમ્ |
પરં શ્યામં તન્ત્રપ્રકરસુભગં દ્વાપરયુગે
કલૌ પુણ્યૈ રલ્પૈ શ્શમિતશમલં ત્વાં હરિ મયે ||||૧૦૯||

ત્વં છન્દસા હિ ગરુડેન તદાઽવિરાસીઃ
યન્મત્તવારણ સમુધ્દ્ધરણાય તદ્વત્ |
સાક્ષાધ્દ્ધરિઃ ગુરુ રિહાઽસિ સમુધ્દ્ધરિષ્ણુઃ
માં કાલનક્રશિતવક્ત્રગતં દયાલુઃ || ||૧૧૦||

કાવેરીતટિની કલિન્દતનયા બૃન્દાવનં તદ્વનં
ગીતં કિં નરજીવનં ભગવતા ગીતં તદેવાદ્ભુતમ્ |
ગોગોપીપશુપાલબાલક મિદં સ્વીયં કુલં ગોકુલં
કર્તું સ્વોન્મુખ મદ્ય ગાયતિ ગુરુર્ગોપાલબાલઃ કલમ્ || ||૧૧૧||

નાદબ્રહ્મ સ્વરસમુદયૈ ષ્ષડ્જમુખ્યૈ સ્સ્વવંશી
નાલે પૂર્વં હ્યધરસુધયા વ્યાકૃતં યામુનાન્તે |
લીનીકૃત્ય પ્રણવમધુરે વૈણવે સ્વીયદણ્ડે
ગાયત્યેકઃ કલમિહ મનોમોહનં બ્રહ્મગીતમ્ || ||૧૧૨||

મન્દં મન્દં વિકચસુમન શ્ચારુબૃન્દાવનાન્તે
કણ્ઠે વેણા વધરિતસુધાં રાગતીતિં વિતન્વન્ |
સ્વાયત્તૈકપ્રકૃતિભિરહો ભક્તગોપાઙ્ગનાભી
રાસક્રીડાં કલયતિ રહશ્શ્રીહરિશ્શ્રી ગુરુર્નઃ || ||૧૧૩||

ખેલન્ દુષ્કલિકાલ કાલિય મહાભોગે વિષાગ્નિચ્છટા
ભોગે સ્વાશ્રિતગોપગોશિશુકુલં ચોજ્જીવયન શ્રીદૃશા |
ગાયન્ વંશધર સ્સદોમિતિ પરં બ્રહ્માત્મકં મોહનં
સઙ્ગીતં નટરાજરાજચિકુરઃ કો વા નરીનર્તિ ચ || ||૧૧૪||

## ૯. વિજ્ઞાનયોગતરઙ્ગઃ

યજુ સ્ત્વં પ્રયોગે ઋગેવ સ્તવાર્થે
ત્વ મુદ્ગીથયોગે તથા સામવેદઃ |
ત્વ માથર્વણં છન્દ એવા ડસિ શાન્તિ
પ્રકલ્પે ડવિકલ્પં ભજે ત્વામનલ્પમ્ || ||૧૧૫||

ત્વાં શ્રુત્યન્તૈ વિશ્રુતાર્થં શ્રુતાર્થં
વિદ્યાવાદૈરુત્તરઙ્ગાતરઙ્ગમ્ |
વ્યાસોદીર્ણં દ્વાપરાન્તાડવતીર્ણં
સૂત્રાત્માનં ભાવયે બ્રહ્મવિદ્યામ્ || ||૧૧૬||

છન્દોડન્ત શ્શ્રીસૂત્રગીતાર્થ નાના
 રત્નશ્રેણીશાનમીડે ત્વદીયમ્ |
સાધૂદ્ઘોષ્યં બ્રહ્મવિન્મૌલિભૂષ્યં
 વાગ્વૈદુષ્યં શાઙ્કરાદ્વૈતભાષ્યમ્ || ||૧૧૭||

બ્રાહ્મં તેજઃ પાદ્મશોભં પદં તે
ધામાદ્વૈતં વૈષ્ણવં તચ્ચ શૈવમ્ |
માર્કણ્ડેયં લૈઙ્ગમાગ્નેયમેકં
સ્કાન્દાકારં વામનં શ્રી ભવિષ્યમ્ ||||૧૧૮||

માત્સ્યં કૌર્મં તચ્ચ વારાહ મુર્વ્યાં
વેદાદ્રીન્દ્ર ક્ષ્માસમુદ્ધારધીરં |
જ્ઞાનં તદ્બ્રહ્મારદીયં શુકોક્તિ
શ્રીમત્પુણ્યં ગારુડે યાજ્ય મીડે ||||૧૧૯||

બ્રહ્માણ્ડસ્થં બ્રહ્મવૈવર્ત મેકં
વેદાર્થાનાં બૃંહકં વેદસારમ્ |
વેદાતીતં વેદ ગુહ્યં ભજે ત્વાં
વેદવ્યાસપ્રોક્ત માદ્યં પુરાણમ્ || ||૧૨૦||

શ્રીમચ્છાન્તનવસ્તવોક્ત્યભિમુખં ગીર્ભિશ્ચતુર્ભિઃ સ્ફુરદ્
બ્રહ્મગીત યશોધ્રુવ સ્તુતિપદં શ્રી ભારતપ્રાભવં ||
દેવસ્તુ ત્યભિરામમઙ્ગલ મહો પ્રહ્લાદ સમ્ભાષણં
મોહિન્યા જગતાં શ્રિયા વિલસિતં રામોન્મુખાખ્યાનકમ્ || || ૧૨૧||

શ્રીમાત ર્યનુવર્તનં યદુપતિસ્તોત્રાર્થસારં મહત્
માર્કણ્ડેય શિવાનુભૂતિ તિલકં મન્દારકલ્પં સતામ્ |
આકલ્પં ધૃતભાવુકં પ્રતિનવાધ્યાયોક્તસારાર્થકં
શ્રીમદ્ભાગવતં શુકોક્તિમધુરં ત્વાં શ્રી ગુરું ભાવયે || ||૧૨૨||

નવનવરસપર્વ શ્રીગુણાઢ્ય શ્રુતીડ્યં
પરમરસવરિષ્ઠં ધર્મરાજ્ય પ્રતિષ્ઠમ્
જયપદ સમભિખ્યં ચારુકૃષ્ણાભિમુખ્યં
ગુરુવર મહમીડે શ્રીમહાભારતં ત્વામ્ || ||૧૨૩||

નિર્વેદાપ્યં સાંખ્યકર્માનુરૂપ્યં
જ્ઞાનાલ્લક્ષ્યં કર્મસન્યાસયોગાત્ |
આત્મ ન્યારા ત્સંયમાચ્ચાઽપિ વિજ્ઞા- -
નાકારા દ્ધા યક્ષરબ્રહ્મ યોગાત્ ||||૧૨૪||

વિધારાજા દ્રાજગુહ્યાદ્વિભૂતે સ્સાક્ષાત્કારા દ્વિશ્વરૂપસ્ય ભક્તેઃ
ક્ષત્રક્ષેત્રજ્ઞપ્રબોધાદ્ ગુણાનાં વ્યક્તે ર્ગમ્યઃ પૌરુષા દુત્તમાચ્ચ |

[Type here]

દેવાદીનાં સમ્પદાં વા વિવેકાત્ શ્રદ્ધાદીનાં મોક્ષસન્યાસયોગાત્
અન્તે ગમ્યં સર્વગીતાર્થસારં બ્રહ્મોપાસે વસ્તુ સાક્ષાદ્ભવન્તમ્ || ||૧૨૫||

બાલત્વં શિવધર્મખેલન રમાપાણિગ્રહડયોધ્યતા
ત્યાગે સન્મુનિલોકરક્ષણવિધા વારણ્યતા લક્ષિતા |
કિષ્કિન્ધાપ્તિ સ્વાપ્તમિત્રકુલ સન્મન્ત્રોદયે સુન્દર
શ્રીશ્ચૂડામણિદર્શને રિપુવધે યૌદ્ધં મહો વ્યઞ્જકમ્ || ||૧૨૬||

આત્મખ્યાપન વૈભવે કુશલિના સર્વોત્તરત્વં પુનઃ
સ્વારાજ્યં સમવાપ્ત માત્મનિ તથા રામાત્મકેન ત્વયા
વાલ્મીકિત્વ મથાસ્તિ ચે દ્વિધિકૃપાલેશાચ્ચ મે નામનિ
શ્રીમત્ત્વચ્ચરિતં રસોલ્બણ મિદં રામાયણં કીર્તયે || ||૧૨૭||

શ્રુત્યન્તકેલિ વિપિનાન્તનિતાન્તકાન્ત
વાસન્તવાસર મિહાદિગુરું ગુરૂણામ્ |
દુસ્તર્ક કર્કશશિલાકકચાયમાન-
વગ્વિક્રમાક્રમિત નાસ્તિકચક્ર મીડે ||||૧૨૮||

# ૧૦. વિમર્શતરઙ્ગઃ

.
ત્વા મધ્યાત્મનભોમણિદીપં
શબ્દા દુજ્જ્વલયા મ્યનુરાગાત્ |
સિધ્દિ ગુણગુણ્યવિભેદા-
ત્સિધ્દં શાસ્ત્ર મસિધ્દ મસિધ્દૌ || ||૧૨૯||

શાબ્દીસિધ્દિર્મેડપરોક્ષા પરોક્ષા
ચાર્થીસિધ્દિ શ્શક્તિરેવાત્રમાનમ્ |
તસ્માચ્છબ્દં પેશલં શૃણ્વતોડત્ર
સ્વાર્થં લબ્ધું પ્રાર્થયે જ્ઞાનવૃધ્દાન્ || ||૧૩૦||

માતુઃ પ્રાણે વ્યોમ્નિલીને મયોક્ત
માનન્દાદેવેતિ વાક્યં પ્રમાદાત્ |
-ધીધીત્યુક્તં તત્પ્રયાણે તયાડન્ત્યે
શાબ્દીસિધ્દિ સ્તત્પ્રસાદઃ સ્તુતૌ તે || ||૧૩૧||

સ્થૂલં શબ્દં સૂક્ષ્મ મર્થં હ્યુપાસ્ય
તત્ત ચ્છક્તીરાપ્ય તસ્મિન્ વિલાપ્ય |
નિર્દંગ્ધેહાવાસના સ્ત્વય્યનન્તે
વીરા ધીરા યાન્તિ તે સુપ્રતિષ્ઠામ્ || ||૧૩૨||

ચન્દ્રોદયા દિવ મમાભ્યુદયા ત્પયોધિઃ
ત્વં ચોત્તરઙ્ગિતરસો મધુરાન્તરઙ્ગઃ |
રત્નાનિ ભાવ મધુરાણિ મુખે પદાનિ
સદ્યઃ ક્ષિપસ્યહમપિ ગ્રથકોડત્રહારે || ||૧૩૩||

ભાષાયા મમરાણાં
ભાષાયાં મમ ચ બિન્દુત સ્ત્વત્તઃ |
બ્રાહ્મ ભારદ્વાજં
હ્યુભયરસં યોગમૈશ્વરં વિન્દે ||૧૩૪||

સદા દ્રવદ્ધ્દયરસઃ પરં રમે
તવ સ્તુતૌ રસહૃદયેવ લેખિની |
ભવત્યધઃ પ્રચુરતમોમષીરસઃ
સ્ફુરત્યતઃ કિમપિ મનોહરં મહઃ || ||૧૩૫||

કલ્યાણેડસ્મિં સ્તે ગુરોશ્શ્રીસમૈક્યે
જીવબ્રહ્મૈક્યાનુસન્ધાન રૂપે
કાવ્યે સ્થૂલારુન્ધતીન્યાયતોડહં
બ્રહ્મસ્થાના ત્ત્વન્મહોડદર્શયં ત્વામ્ || ||૧૩૬||

સ્તુતિઃ પ્રસૂતિ ર્મમ તે મનઃ પ્રિયા
પ્રિયસ્ત્વમસ્યા હૃદયૈકગાહનઃ |
દ્વયે તદદ્વૈતમિદં ભજત્યતઃ
કુતોડયમસ્મિન્ સદસદ્વિવાદઃ || ||૧૩૭||

યદ્વેદનાયા સ્સમભિષ્ટુતં ત-
ત્સૌન્દર્ય માર્યૈરનુભૂતિધુર્યૈઃ |
તદ્વેદનાભિ શ્શ્રુતિભિર્હ્યવેદ્યં
ગીર્ભિઃ પ્રપદ્યે ગુરુમર્થ માદ્યમ્ || ||૧૩૮||

લિપ્યાં ભાવઃ વિન્દતે શબ્દરૂપં
તસ્મિં શ્ચાર્થવ્યક્તયો વૃત્તિમૂલાઃ |

 તસ્યા જ્ઞાનં તત્પ્રયોગે નિદાનં
તન્મૂલં ત્વાં વિશ્વતશ્ચક્ષુરીડે || ||૧૩૯||

જડાનાં વર્ણાનામજડપર ચૈતન્યવપુષઃ
સદર્થ સ્યાસઙ્ગા દ્ભવતિ હૃદયે સ્પન્દન મપિ |
અયસ્કાન્તાસઙ્ગાદયસ ઇવ તત્ સ્પન્દનવશાત્
ય આનન્દ સ્તં ચ શ્રુતિરવદદર્થં રસ ઇતિ || || ||૧૪૦||

કવે શ્રોતુસ્સઙ્ગ શ્ચિતિયદિભવે દ્વર્ણશબલં
તદા ચિત્તં શૂન્યં ભવતિ પરમૈક્યં ભજતિ ચ |
તદૈક્ય સ્ફૂર્તેર્વા રસિક ઇહ ચાત્મૈવ ભવતી
ત્યતદ્ભિન્નં માનં ગુરુમિહ ભવન્તં હિ કલયે || || ૧૪૧ ||

અસ્તિત્વં તદ્વસ્તુનો ભાવરૂપં
ભાવ સ્સત્તા સાડપિ નિશ્શબ્દબોધ્યા |
સંવિત્ તસ્યાઃ પ્રત્યયઃ પ્રત્યયેન
સ્યાત્તસ્માત્તં ત્વામુપાસે હ્યશબ્દમ્ || || ૧૪૨||

આદિ ક્ષકારાન્ત સમસ્ત વર્ણા-
સ્સમાહૃતા હ્યક્ષપદેન વિશ્વમ્ |
તદ્ગ્રાહ્યમેતત્સકલં હિ દૃશ્યં
તદ્ગ્રાહકં ચેન્દ્રિય મક્ષમાહુઃ || ||૧૪૩||

ગુરુર્યતોડનીદૃગનક્ષગમ્યો
હગક્ષમાલાગ્રગમેરુરમ્યઃ |
તતો ભજે ત્વાં ગુરુ મિન્દ્રિયાણા-

[Type here]

મગમ્ય મપ્યાત્મતયા સુગમ્યમ્ || ||૧૪૪||

જ્ઞાન પ્રકાશાર્થકધાતુસિધ્દં
નામદ્વયં તજ્જડમપ્યપેતમ્ |
દ્વૈતાન્નિવૃત્તાવ જડં ચ તત્ત્વં
ત્વં તદ્યદિ સ્યાઃ કિમુ તત્ર ચિત્રમ્ ||||૧૪૫||

તત્ત્વમિત્યયિ પદાર્થતઃ પદં
ન યં દ્વયમિવાવભાસતે |
તદ્વદાત્મ પરમાત્મ ભેદતઃ
તત્વતસ્ત્વમપિ ચાદ્વયં દ્વયમ્ || ||૧૪૬||

વીણાવાણ્યોસ્સ્વર વિનિમયત-
સ્સિધ્દાડભેદ શ્શ્રુતિ સમરસયોઃ |
તત્રેમામિત્યનુરણ વશા-
દ્ભેદેડભેદ સ્સ્વરસ ઇહ ભવાન્ || ||૧૪૭||

બીજપદે હિ તથા ખલુ જીવઃ
જીવપદેડપિ તથૈવ સ બીજઃ |
તત્સ્વરસમ્પદભેદવિકાસં
ત્વામુભયાર્થ મયે હ્યભયાર્થમ્ || ||૧૪૮||

બ્રહ્મ નિર્ગુણમપિ સ્વતો ભવાન્
ગૌણતસ્તુ ભગવા નિતીડ્યતે |
દ્વૈતમેવ ખલુ ગાહિતં યતો
ભાક્ષરેણ ભવતાવતા સમમ્ || || ૧૪૯||

ઉભયાત્મક ભાવના ભયાય
પ્રભવે દિત્યભયાત્મકં ભજે ત્વામ્ |
સ્વરતોહ્યપરાધતસ્ત્વનર્થ
સ્સુમહાન્નશ્શ્રુતિવિશ્રુતો યતોઽસૌ || ||૧૫૦||

પ્રાયોઽન્તગં તત્સકલં સમસ્તે
વ્યનક્તિ દૃશ્યં પદમન્તરસ્થમ્ |
સર્વાન્તરં નિષ્કલ માત્મવસ્તુ
વ્યનક્તિ તત્ત્વેન વિભાવયે ત્વામ્ || ||૧૫૧||

પ્રાતિપદિકતો યલ્લિઙ્ગ મુખ્યાવબોધે
અવ્યયમુખગમ્યં પ્રત્યયં લુપ્ત માહુઃ |
એવ મનુજિઘૃક્ષુઃ પ્રાપ્તલિઙ્ગોઽપ્યલેપઃ
પ્રાતિપદિકમાત્ર શિષ્યસે તત્ ભજે  ત્વામ્ || ||૧૫૨||

કપ્રત્યયસ્ય પ્રકૃતિ વિચિત્રં
પ્રાયઃ પદં સ્વાર્થ ઇતિ પ્રસિદ્ધ્યા |
બુધો ભવે ત્પ્રત્યયવાન્ યતસ્તે
કસ્મૈ નમ શ્ચિત્સ્વરસાયકાય || ||૧૫૩||

લોકેઽનુકમ્પા કરુણાદિનામ
પર્યાયતોઽભિન્ન મથાઽપિ ભિન્નમ્ |
વ્યુત્પત્તિવાદાદિહ તત્તદર્થાઽ
ભેદાન્વયો યત્ર ગુરું તમીડે || ||૧૫૪||

અવેતિ રક્ષાર્થક ધાતુ સિદ્ધ
મોઙ્કારમાહુઃ પ્રણવં પદજ્ઞાઃ |

અત સ્તદર્થ પ્રવણં ગુરૂણાં
ગુરું ભવન્તં પ્રણમામ્યનન્તમ્ || ||૧૫૫||

બિન્દૌ સ્પન્દાવ્યોમ્નિ  ત દ્વિ઼ઘુદાભાત્
જ્યોતિ વ્ર્યક્તં વ્યક્તનાદ સ્તતોડભૂત્ |
ઓઙ્કારોડસૌ તત્પ્રવૃત્તે નિવૃત્તેઃ
સન્ધ્યા દ્વારં શાન્ત્યગારં શ્રયે ત્વામ્ || ||૧૫૬||

ઓમાહુઃ પદ મેક મક્ષર મજં નૈકં ચ ન પ્રત્યયં
ન સ્પર્શં ચ ન લિઙ્ગ મવ્યય મહો નોષ્મં ચ નાન્તસ્થકમ્ |
તસ્માજ્જાત મશેષવાઙ્મયજગબ્દ્રહ્માત્મકત્વેન તત્
સત્યં તત્ ત્વમસી ત્યરૂપક મપિ ત્વાં રૂપભાજં ભજે |||| ૧૫૭ ||

યન્ત્રં મન્ત્રં તન્ત્રમેકં હિ ભૂતે-
શ્ચિત્તે નાપ્યં ચોભયે નાહુરાર્યાઃ |
તત્રોઙ્કારં સૂક્ષ્મમાહુર્નિદાનં
તત્તેડરૂપસ્યાડપિ રૂપં હ્યુપાસે || ||૧૫૮||

સોડહં સોડહમિતીરિતે હિ વિજહત્તદ્વ્યઞ્જનં સુસ્વરં
મૂલાધારમુખેષુ ષટ્સુ કમલેષ્વઞ્ચન્ત્યસૌ નઃ પરા |
વૃત્તિઃ પ્રાણમયી નિલીય પરમે સૂક્ષ્મેડર્થતન્માત્રકે-
વિશ્રામ્યત્યથ તે પદે પરતરે સૌધે સહસ્રારકે || ૧૫૯||

નાસ્તીત્યત્ર ચ તે નરાકૃતિતયા સત્તા સ્ફુરત્યાત્મનઃ
સામાન્યેડપ્યમૃતોત્તરં સુખમસામાન્યં સ્ફુરસ્યન્તરે |
વસ્ત્વન્તે ત્વમનન્તમન્તમપિ નશ્ચિત્રં વિભાસ્યદ્વયં||
સ્તોત્રે ડસ્મિન્ પ્રતિપાદિતં ત્વમસિ તત્ સત્યં શિવં સુન્દરમ્|| ||૧૬૦||

મિથ્યેત્યાહુરિદં જગત્ શ્રુતિશિરઃ શુધ્દ્ધાન્ત સિધ્દ્ધાન્તિનઃ
તસ્યાऽऽહુઃ પિતરા ઉમાત્રિણયનૌ તેऽપ્યાગમજ્ઞાનિનઃ
કૃત્વા માતર મન્તરે પિતર મેવાऽऽહ બહિ ૨શાબ્દિકાઃ
તત્વખ્યાપન હેતવેऽત્ર ગુરવે કસ્યૈ નમઃ ખ્યાતયે || ||૧૬૧||

સાંખ્યં ભક્તિરથાऽપિ કર્મ પરમં યોગોऽથવેત્યાકુલં
સચ્ચાસચ્ચિદચિત્પરા પ્રકૃતિરિત્યત્યન્ત મુચ્છૃઙ્ખલં
શમ્ભુ વિષ્ણુરુમા રમેતિ સકલં વિશ્વં વિભેદાકુલં
સ્વાચાર્યસ્ય મહાર્થ વિચ્યુતધિયાં શાબ્દોऽયમાऽમ્બરઃ || ||૧૬૨||

ત્વાં ધ્યાયામ્યહમન્વહં ત્વમસિ મે ધ્યેયસ્તથાऽહં તવ-
ધ્યાતેત્યત્ર તુ યુષ્મદસ્મદભિધે વાક્યત્રયે ગોચરે |
તત્તત્કારકજાત તત્પ્રકૃતિ તત્તત્પ્રત્યય ક્ષેપતઃ
શિષ્ટં યત્પ્રિય મસ્તિ ભાતિ તદિદં સત્સંવિદં ત્વા મયે || || ૧૬૩ |

વ્યર્થસ્સન્ વિતનોતિ મોદ મમલં રેખાક્રમો રઙ્ગવ-
લ્લ્યામુન્મત્ત જડાહિતોऽનિયતિતઃ ક્ષોભં તતો ગમ્યતે |
જ્ઞાનાનન્દમયૈક હેતુ સકલં દૃશ્યં હ્યધિષ્ઠાનદૃગ્
ગમ્યં રમ્યમતોऽન્યદન્યદિતિ તત્વામાશ્રયે સ્વાશ્રયમ્ || ||૧૬૪||

વૃદ્ધ્યનુભાવિ ગુણાવિર્ભાવં વ્યાકૃતનામ વિચિત્રિત રૂપમ્ |
અદ્ભયમેવ પરં ત્વામન્તે તન્ત્રમયે શિવ સૂત્રાત્માનમ્ || ||૧૬૫||

## ૧૧. પ્રકાશતરઙ્ગઃ

શ્રુત્યન્તવર્ત્મસુ વિમૃગ્ય વિમર્શ ધૂલી-
પાલીષુ યન્તિ મણિગુપ્તિષુ તત્પ્રકાશમ્ |
બાલા ગુરું મણિમિવ સ્વતએવ સિદ્ધ-
મન્મીલિતં ભવતિ યેન તદાત્મચક્ષુઃ || ||૧૬૬||

જડાજડમયે વિયત્પ્રભૃતિભૂતપઞ્ચીકૃતે
લુઠન્તિ ગુણશક્તયો જગતિ રુદ્રસઙ્જ્ઞાશ્રિતઃ |
ત્રિશક્તિ કૃત જૃમ્ભણા સ્તદસિ ચિદ્વિમર્શાખ્યયા
પ્રકાશ ઇહ ગોચર સ્ત્વમુમયા ગુરુઃ શઙ્કરઃ || ||૧૬૭||

હંસ સ્ત્વં ત્વદનૂચ્ચલદ્ધચિચયો ભાવઃ કદમ્બ શ્રિતાં
ચિત્તે મે શશિકાન્તદર્પણતલે ચિત્રં સ્ફુરન્ મે પુનઃ |
સ્તોત્રેઽસ્મિન્ રસવીચિકા તરલિતે પદ્માકરે પ્રસ્ફુરન્
ત્વામઞ્ચત્કલહંસ મેવ કલયત્યદ્વૈત મત્યદ્ભુતમ્ || ||૧૬૮||

બિમ્બં ચિત્પ્રતિબિંબિતં જગદિદં દૃશ્યં સમસ્તં પુનઃ
શુદ્ધાન્તઃકરણં તદેવ કરણં બિમ્બગ્રહે દર્પણમ્ |
બિમ્બસ્ફોરક એષ કેવલ રસાલેપોઽવમૃષ્ટસ્સચેત્
તત્રાભાતિ ન દૃશ્ય મુલ્લસતિ તત્જ્યોતિ સ્સ્વયંજ્યોતિષિ || ||૧૬૯||

ભાનોરુન્મુખ એવ દર્પણતલે બિમ્બં પત્યાત્મન-
શ્ચૌન્મુખ્યં ભજતિ સ્ફુરત્યથ ભવાનાત્મા તથા ચેતસિ |
વ્યત્યસ્તે હ્યુભયત્ર ચાસ્ય જગતો ભાનં તદાભાસકં
જ્યોતિશ્ચાઽપિ તદેવ તત્પરમહં જ્યોતિર્ભવન્તં શ્રયે || ||૧૬૯||

ધીસૃષ્ટિસ્સકલા હિ સૃષ્ટિરચના ચૈતન્યતસ્સાક્ષિતઃ
સર્વં ચેતયતે જડં રવિમુખે પદ્મં યથા વિશ્વથમ્ |
વ્યક્તિસ્તદ્વદિહાઽપિ પુણ્યમહસાં સાક્ષી ગુરુસ્તત્કૃપા-
દીપ્તિશ્ચોદયતે ધિયં હિ પરમાં છાત્રે ગુરા વુન્મુખે || || ૧૭૧ ||

ત્વમાદિ સ્વરાર્થ સ્તદન્તે તદાદ્યે
પરં સ્પર્શવર્ણે ત્વમાદ્યન્તયોશ્ચ |
પુનઃ સ્પર્શયોરૌત્તરસ્પર્શયુગ્મે
પરાન્તે વિશેષ્યોઽવિશેષ્યો વિભાસિ || ||૧૭૨||

સ્થિતેઃ પ્રાદુરાર્યા ભવન્તં હિ સૃષ્ટેઃ
લયસ્યાઽપિ કતાર્રમેકં ત્રિરૂપમ્ |
ત્રિનામાનમેતન્મતં કાર્યદૃષ્ટ્યા
સ્વત સ્ત્વં " ડુકૃઞ્ " ધાત્વતીતોઽસિ કિં વા | ||૧૭૩||

અનાદેરહઙ્કારતઃ કર્મબીજાત્
જગત્સમ્પ્રવૃત્તં ધિયા સંસ્થિતં ચ |
લયં યાતિ સર્વં તદેતદ્ધિમાયા-
કૃતં ભાતિ નિદ્રાકૃતસ્વપ્નશોભમ્ ||||૧૭૪||

ઇયં કા નુ માયા હિ નિદ્રાઽઽગતા સ્યાત્
કુતો વેતિ યા માવધીત્થં વિચાર્ય |
ગતા સ્તાસ્તુ નિદ્રાં વિનિદ્રાશ્ચ યા માં
ગતાસ્તે પ્રજાસ્ત્વત્પદારુણ્ય શોભામ્ || |||૧૭૫||

મિથસ્તસ્તમશ્ચ પ્રકાશો વિરુદ્ધૌ
તયો શ્છાયયા યૌગપદ્યઞ્ચ સિદ્ધમ્

તતશ્શુધ્દ માલિન્ય વૈધર્મ્ય રૂપા
સ્થિતા ચ્છાયયા સોપમેયા હિ માયા || ||૧૭૬||

વિશુધ્દાર્થદાડન્યા તિરોધાનકર્ત્રી
તથા તા મુપાસ્યાડન્યથા તામપાસ્ય |
ત્યજન્ત્યાત્મભેદપ્રસર્પં હિ સર્પ
ભ્રમં રજ્જુમુક્તા સ્તતોડપ્યન્તતસ્તામ્ || ||૧૭૭||

અધશ્છાયયા સંશ્રિતં દીપ પાત્રં
તથા માયયા ચ શ્રિતં જીવતત્વમ્
ઇયં નાસ્તિ ચાત્મોન્મુખે વસ્ત્વવસ્તુ
પ્રકારઃ કિમસ્તીદૃગન્યો વિકારઃ || ||૧૭૮||

તયૈતજ્જગદ્ભાતિ નાનાવિભાસં
વિભાત્યેતદાત્મન્યહો નો વિભાતિ
અભાનેડપિ ભાનેડનુવિધ્દં યદન્ત-
સ્તદન્તશ્રયે જ્યોતિરન્તર્ભવન્તમ્ ||||૧૭૯||

ગુહાયાઞ્ચ ગુહ્યાં સ્વયં સુપ્રભાન્તાં
સુધીરસ્સ્વત શ્ચાવિનાભૂતસત્તામ્ |
ત્વયૈકાં તયૈકં તથૈવાહ મીક્ષે
મહસ્તત્ તદાહં ચ પૂર્ણાહ મીક્ષે || ||૧૮૦||

ચતુર્વસ્તુસઙ્ઘઃ પ્રદીપોડક્ષયોડયં
ભવેદીષદીષત્ ક્ષયો વસ્તુનોશ્ચેત્ |
તયોસ્તત્સમગ્રક્ષયે ડયં સમગ્રઃ
સ્વકાધાર શમ્યાવશિષ્ટો નિલીયેત્ || ||૧૮૧||

વિરાટ્ તદ્ગુણાનાં ચ શક્તેસ્સમષ્ટિઃ
તમસ્ત દ્રજશ્ચેત્ક્ષતં દીપ્તમૂર્તિઃ |
તયોસ્તત્સમગ્રક્ષયે ઽયં સમગ્રઃ
સ્વકાધારશક્ત્યાવશિષ્ટો નિલીયેત્ || || ૧૮૨||

યથા દીપસાપેક્ષકં સાધનં તત્
તથાઽત્રાઽપિ શક્તિર્વ્યપેક્ષાવતી સ્યાત્ |
પ્રભોસ્સર્વશક્તેસ્તતશ્શક્તિ તદ્વ
 દ્વિપક્ષા ઽનધીનં ભજે ત્વાં સુધીનમ્ || ||૧૮૩||

પટાન્તઃ પ્રકાશો ન ચે ચ્છાયયા ન-
સ્ફુરત્યેવ ચિત્રં જગચ્ચિત્ર મેવમ્ |
હૃદન્તસ્ત્વમીશો ન ચેન્માયયા ન
સ્ફુરત્યેવ તત્ત્વામયે ચિત્પ્રકાશમ્ |||| ૧૮૪||

તતોઽહન્તુ માયાકૃતં વિશ્વચિત્રં
નિરસ્યાઽપિ શુદ્ધા મુપાસ્યાઽપિ તસ્યામ્ |
સ્વતોઽપાવૃતાયાં પ્રદત્તાન્તરાયાં
પ્રવિશ્યાન્તરાન્તઃ કમપ્યર્થ મીક્ષે || ||૧૮૫ ||

પુરસ્તાચ્ચ પશ્ચાદધાસ્તા ત્પરસ્તા-
તથા પાર્શ્વયો સ્સર્વતો દેશતશ્ચ |
ઉષઃ પ્રાતરહ્નિ પ્રભુસ્ત્વં દિનાન્તે
નિશાયાં ચ સન્ધ્યાગતઃ કાલત સ્ત્વમ્ || ||૧૮૬||

સુરેન્દ્રા નમન્મૌલિ કોટીર કોટિ

સ્ફુરદ્રત્ન મઞ્જુપ્રભા દીપપુઞ્જઃ |
ત્વદાજ્ઞા પ્રસાદેન ધન્યત્વસિદ્ધ્યૈ
ત્વરન્તે ત્વદીયાઙ્ઘ્રિ નીરાજનાય || ||૧૮૭||

અજાણ્ડે પ્રતીડકેત્ર પિણ્ડાણ્ડકે ચ
સ્સુરર્ષ્યાદિવર્ગ સમગ્રોડસ્તિસર્ગઃ |
ત્વગાદીન્દ્રિયાર્થાનધિષ્ઠાય ચાજ્ઞા
વશો વર્તતે ત્વદ્વશાન્ રક્ષતે ચ || ||૧૮૮ ||

પ્રભુત્વં યત સ્સાર્વભૌમો યત સ્ત્વં
યત સ્ત્વં નિયન્તાડનિયન્તા યત સ્ત્વમ્ |
દિગન્તૈક કાન્તા અનન્તા અજાન્તા ||
ભયાત્ત્વત્ત્વદાપ્તા નવત્યસ્વતન્ત્રાઃ || ||૧૮૯ ||

સ એવાણિમાદે ર્વિભૂતે વિલાસો
વિલીનાશ્ચ તસ્મિન્ મનોલીન માત્રે |
કુલીનાશ્ચયોગે પ્રલીનાઃ પ્રયોગે
કૃપાતસ્તતો મામપાયાચ્ચ પાયાઃ || ||૧૯૦ ||

યદેતત્પુરાલબ્ધપુણ્યોદયાપ્તં
સુખં દૈવ્યમાપ્તં ભવત્કર્તૃકં તે |
બુધા મન્યમાના ભજન્તે ભવન્તં
તદેષામુદાસીન એવાડસિ નાથઃ || ||૧૯૧ ||

અસઙ્ગેડનપેક્ષે સ્વસાક્ષિણ્યમેયે
ન સઙ્કલ્પલેશો ભવેદ્વા વિકલ્પઃ |
ત્વયીદન્તુ ભક્ત્યા સમધ્યસ્ય ભક્તા

વિશુધ્દ્ધાન્તરા ધ્વસ્તવેગા ભવન્તિ || ||૧૯૧ ||

ક્રમાદાપ્તકામા નિરસ્તાર્થકામાઃ
સ્વધર્માદ્વિશુધ્દ્ધાન્તરા મોક્ષકામાઃ |
તત સ્તેઽપ્યુદાસીનભાવં ભજન્તે
ભવદ્ભાવનાત્તાઽઽત્મતૃપ્તા વિમુક્તાઃ || ||૧૯૨ ||

તદા શેષભાવો ન તેષામથાઽપિ
ત્વયીદં ગુરુત્વં કદા હીયતે ન |
નદીનાં નદીત્વે ગતેઽપ્યબ્ધિભાવા-
ત્કદાઽપ્યબ્ધિતા કિં ન હીયેત વાર્ધેઃ || ||૧૯૩||

પિતા શઙ્કરો ન સ્તદદ્વૈત વૃત્તિઃ
પ્રસૂ ઽશાઙ્કરી તત્સપર્યા વિલાસે |
શિશુઃ ક્રીડતે તદ્વિભાવાનુ ભાવ-
પ્રભૂતાનુભૂતે ભવાન્ પૂર્ણપાત્રમ્ || ||૧૯૫||

ગુરુઃ શઙ્કર સ્ત્વં શિવશ્શઙ્કર સ્ત્વં
પુન શઙ્કરોષિ સ્વત સ્સ્વં કરોષિ |
ન નશ્શઙ્કિતં તન્મન શ્ચાઙ્કિતં તે
નમ શઙ્કરાય પ્રભો શ્રીકરાય ||||૧૯૬||

ક્વચિન્માનભાવઃ ક્વચિદ્દીનભાવઃ
ક્વચિધ્દ્ધીરભાવઃ ક્વચિદ્ભીરુભાવઃ |
વિચિત્રઃ સ્વભાવ સ્ત્વદીયાત્પ્રભાવાત્
તદીયોહ્ય ભાવોઽનુભાવ્યઃ પ્રભો મે || ||૧૯૭||

વિચિતં હિ ચિત્તં પ્રસુપ્તં કદાચિત્
પ્રબુદ્ધં કદાચિન્નિબદ્ધં ક્વચિચ્ચ |
ચિદાખ્યાવ્યયે નાનુવૃત્તં યદેત -
ત્તદેવૈમિ તેન પ્રમુક્તશ્ચ ભૂયામ્ || ||૧૯૮||

મદન્તર્લુઠન્તિ પ્રભો કેડપિ શબ્દા-
સ્તદન્તઃ સ્ફુરન્તિ પ્રભો કેડપિ ચાર્થાઃ |
અનન્તા હ્યનન્તે ત્વયીમે હિ શાન્તા
મમૈકાન્તિકાન્તઃ પ્રશાન્ત્યૈ ભવન્તુ ||૧૯૯ ||

પટાટોપતો દુર્ઘટાટોપતો વા
જટાટોપત શ્ચોત્કટા દુદ્ભટાશ્ચ |
જટાજૂટ કોટીર કોટિ ત્વિષસ્તે
વટાન્ત ર્નિષણ્ણસ્ય મૌનાત્સમૌનાઃ || ||૨૦૦||

તપઃ કિં જપઃ કિં સ્તુતિઃ કિં નતિઃ કિં
પતિત્વં તતોડપ્યન્તત સ્સોપચારમ્ |
કિમેત જ્જગચ્છિક્ષણાર્થં વૃણીષે
તદેત દ્વિસર્ગોન્મુખં નામરૂપમ્ ||||૨૦૧||

દયા તે સ્વભાવોડભયં તે પદં નિ-
શ્ચયાત્તે ચ્યવન્તે ન સન્ત સ્ત્વદીયાઃ |
ભયં મે વિનેયં દયાડસ્મિન્ વિધેયે-
ત્યલં વત્સલં મે મનો મૌનયોગે ||||૨૦૨||

ભવાનપ્રમેય પ્રમેયઃ પ્રમાતૃ-
પ્રમેય પ્રમાણાદિ ભાષા વિલાસમ્ |

તદધ્યાત્મશાસ્ત્રસ્ય લાસ્યં વિહસ્ય
સ્વતો મૌનતો વસ્તુ કિં વા ભવામઃ || ||૨૦૩||

ત્વદન્તે વસન્તો વસન્તં હૃદન્ત-
ર્વસન્તં યથાઽહં તથા ભાવયન્તઃ |
વસન્તાનનન્તાન્ મુદા યાપયન્તઃ
કૃતાન્તં ચ સન્તર્જયન્તશ્ચરામઃ || ||૨૦૪||

પરાઽપર વિચાર મત દૂરતરમન્ત-
શ્ચરાચર જગદ્ભર ધુરન્ધર મુપાસે |
નિરાવરણ ભાસ્કર સુધાકર સહસ્રો-
ત્કરાન્તર મહશ્ચરણવિસ્ફુરણ મીડે || ||૨૦૫||

## ૧૨. અદ્વૈતપઞ્ચકમ્

નલિને ચ તદન્તરાલિ વર્ણે
કૃતભેદં ધૃતનૈલ્ય મદ્વિતીયમ્ |
નયનં તવ સદ્વિતીય માસી-
ત્કથ મદ્વૈતગતિ ર્વિભેદદૃષ્ટેઃ || ||૨૦૬||

સ્વયમીશ તનોષિ માં વિહાય
સ્ફુટરાગં યદુમાપદેઽદ્વિતીયઃ |
અસિ તેન શિવ શિવાદ્વિતીયઃ
કથ મદ્વૈતગતિ સ્સરાગવૃત્તેઃ ||૨૦૭||

અપિ યાસિ યયા વિદાત્મ સઙ્ગં
બત તત્ સ્ત્રીત્વમથાઽપિ નામ રૂપમ્ |
ભજસેઽદ્વય એવ સદ્વિતીયઃ
કથમદ્વૈત ધૃતિસ્સસઙ્ગવૃત્તેઃ || ||૨૦૮||

તનુષે પરમે હિ શૂન્ય નાદે
બૃહિધાતુ પ્રતિપન્ન નામરૂપે |
પુરતઃ સ્ફુરણં ન હે શિવાદ્યે
કથ મદ્વૈતમતિ વિરુદ્ધરીતેઃ || ||૨૦૯||

સકલં પદમેવમર્થશૂન્યં
ત્વયિ વસ્તુ ન્યકલેઽનુમાનગમ્યે |
કલયેઽહમત સ્તદેવ સત્યં
પરમાદ્વૈત મુપાસ્ય મૌનમુદ્રામ્ || ||૨૧૦||

સમુદિતેડસ્તમયાભિમુખેડબ્જિની
હૃદયરાગકરે ખલુ ભાસ્કરે |
કુમુદિની રમણે વિયદઙ્ગણેડ
પ્યુડુગણે ચ ભવન્તમયે ધૃણિમ્ || ||૨૧૧||

સુમનસાં મનસાડપિ સમર્ચને
સુમનસાં વચસા મપિ સૌરભે |
તનુમનોનયન શ્રવણાદ્ભુતે
|સ્ફુરસિ ન સ્ત્વ મતીન્દ્રિયસુન્દરઃ || ||૨૧૨||

નવરસે કવિતાસ્વરસે સ્વત-
સ્સુવિહિતે ડન્નરસેપિ ચ ષડ્રસે |
સ્વરલયાઞ્ચિતગાનસુધારસે
સ્ફુરતિ મે ડનુભવૈકરસો ભવાન્ ||||૨૧૩||

પરમકર્કશતર્ક વિખણ્ડને
શ્રુતિ શિરોવચસામપિ મણ્ડને |
સુરમુખેડપિ મખે દ્વિજસમ્મુખે
પદવિધૌ ત્વમસિ સ્ફુરણં ચિતઃ || ||૨૧૪ ||

શશિમુખેડમૃતરોચિષિ સુસ્મિતે
વિશદવલ્ગુ વચો જુષિ નન્દને |
વશિજને પરમાયુ રુપેયુષિ
સ્ફુટમહં ભવત સુષમા મયે |||૨૧૫||

## ઋતુરૂપેણ શ્રી ગુરુમૂર્ત્યનુસન્ધાનમ્ -

### વસન્તઃ
નવવસન્ત દિનાન્ત સુહાસિની
દિશતિ તે હૃદયં મમ મલ્લિકા |
સરલ મન્દગતિ સ્સુરસાકૃશાનુ
વિશતિ તે હૃદયં ન કવેરજા || ||૨૧૬||

### ગ્રીષ્મઃ

વ્રતમુપેત્ય યતેસ્તવ સક્તુભિઃ
પરિણતામ્રફલૈર્લઘુ જીવનઃ |
તપ ઉપાત્તતપા સ્સમુપાદધૌ
વિકચપાટલ ડમ્બર મમ્બરમ્ |||૨૧૭||

### વર્ષઃ
ઉરુનિદાઘ દિનાત્યયશીતલ
સ્ત્વમિવ નો જલદો રસપેશલઃ |
સ્ફુરતિ નીલગલો ધૃત ચન્દ્રિક
સ્સપદિ તે કલયન્ નટરાજતામ્ |||૨૧૮||

### શરદ્
શરદુદાર સરસ્તરલૈ સ્સરો
રુહશતસ્ફુરણૈઃ પ્લુત દિઙ્મુખૈઃ |
પરિમલૈ ર્ભજતે ગલિતેષણા
પરિમલન્તુ ભવન્ત મહં યથા |||૨૧૯||

 નવનવોન્મિષ દબ્જ દલદ્લ
ક્રમવિમોહન ચઙ્ક્રમણક્રમમ્ |
અહ મિવાઞ્ચતિ તે પદમઞ્જસા
શરદિ હંસકુલં સકલં પ્રભો || |૨૨૦||

હવિરૂપાહિત માગ્રયણેષ્ટિકં
તવ મુખં ચરણં તવ ભૂતલમ્ |
મમ વચઃ ક્રમતોઽહ મિવ પ્રભો
શરદિ પૂર્ણતિથૌ ભજતઃ પરમ્ || ||૨૨૧||

**હેમન્તઃ**

ભવતિ યજ્વભિરિષ્ટિ વિશેષતો
ભવતિ યજ્ઞપતૌ હવિરાહિતમ્ |
ધનુષિ ચઙ્ક્રમણે મકરે રવે
ર્ભવતિ સઙ્ક્રમણે ચ હિમાગમે || ||૨૨૨||
શિશિરઃ

હસિત કુન્દસુમૈ ર્ગલિતામૃતૈ-
રપિ ચ પાશુપતૈ શિશશિર શિવમ્ |
તવ શિવસ્ય નિશીથ સમર્ચને
ભજતિ લિઙ્ગ સમુદ્ભવ હેતુકમ્ || ||૨૨૩||

તરુણયાઽઽભરણાયિત ચિત્સુખ

કરુણયા હ્યનયા ચરણાનતો
સ્ફુરણયાડરુણયા વપુષ શ્રિય: |
ધ્દ્રણયાત્વમુમા રમણસ્તયા || ||૨૨૪||

## રાગમાલિકા

ભૂપાલ પ્રતિબોધિત સ્ત્વમુષસિ પ્રાતશ્ચ કેદારગઃ
ધન્યાસિ સ્તુતિગોચરા મનુગત શ્શુધ્દ્ધાં ચ સોલ્લાસકામ્ |
કાવેરીં સુરમોહિનીં ચ સુરટાં સન્મધ્યમામદ્ભુતં
ગૌરીં શ્રી મણિરઙ્ગગાં બહુવિધં શ્રીરઞ્જનીમર્ચયન્ || | ૨૨૫||

રાગં સાધુમુખારિમીક્ષ્ય પરમં કલ્યાણિયોગં ગત-
સ્તન્વંશ્ચારુવરાલિ માત્મનિ વહન્ સાક્ષા જ્જયન્ત શ્રિયમ્ |
સારઙ્ગાઙ્ક કલાધરો હ્યવધરન્ વાચસ્પતે ર્ગીતકં
શ્રીરામપ્રિય શઙ્કરાભરણ ધીવૃત્તિઃ પરાં ભૈરવીં || ||૨૨૬||

સમ્ભાવ્યાડથ સુમોહનં હ્યનુવદન્ શ્રીકીરવાણીં શ્રુતિ
શ્રુત્યન્તાર્થ વસન્તરાગ રસિક સ્ત્વં સાર્વભૌમો યતિઃ |
દાન્ત શાન્ત ઇહૌષસં પરશિવ શ્રી સુન્દરીદેવતા
સેવારાજ્ય ધુરન્ધરો વિજયસે નીરાગ રાગક્રમઃ || ||૨૨૭||

ક્વચિદ્દ્વારેડગારે ક્વચિદપિ વિદૂરે પરિસરે
ક્વચિ ન્નીરે નદ્યાઃ ક્વચિદપિ ચ તીરે સુમધુરે |
વસન મૌનેડમૌને વિપુલપુલિને દેવસદનેડપ્યનીહ-
વ્યામોહં કલયસિ રસં ન સ્સમરસમ્ || ||૨૨૮||

શ્રુત્યા ક્રીડસિ મોદસે સ્મૃતિચયૈ વ્ર્વ્યાસોક્તસૂત્રો ક્તિભિઃ
પ્રીણાસિ પ્રણયાત્કલાશ્ચ સકલાઃ ક્રીણાસિ નૈજશ્રિયા |
પુષ્ણા સ્વાગમિક શ્રિયામપિ મનો મુષ્ણાસિ ભાવેન ત-
દ્ભિક્ષૂણામપિ નાયક સ્ત્વમસિ નો દક્ષઃ પ્રભુર્દક્ષિણઃ || ||૨૨૯||

સ્થાયીભાવોરતિ રુપચિતો યાતિ શ્રૃઙ્ગારભાવં
તસ્યાજ્જ્વલ્યં ભવતિ શુચિત શ્રીગુરોશ્ચાવલમ્બાત્ |
વિન્દન્ દુઃખં સુખમપિ ગુરૌ દૂરગે દ્વારગે વા
નિષ્પ્રારબ્ધો ગુણમયમયં દેહમાપ્તો જહાતિ || ||૨૩૦||

આસીન પ્રચલાયિતં મમ મનઃ સ્થાણું ભવન્તં ગુરું
લબ્ધ્વા નોલભતે હિ યોગમચલં લબ્ધ્વા યથા વાનરઃ |
સ્વાત્માનં નભજત્યો પુનરયં ચાત્માડપિ સન્ વાનરઃ
કિં વા ભેદવતાં ભવેદનુભવો માયા વિપર્યાસિનામ્ || ||૨૩૧||

વેદ્યં સર્વં ગુરુમુખત ઇત્યાહુ રન્તે રહસ્યં
વ્યાખ્યાતારો ગહનહૃદયા મન્ત્રતન્ત્રેષુ લુબ્ધાઃ |
કિં વા તેષામપિ ભજનત સ્સ્વાત્મદસ્ત્વં યતસ્ત્વા-
મધૈવાપ્તં પરમકરુણાસિન્ધુ મેવાશ્રયામઃ ||||૨૩૨||

મહાયોગા સ્સર્વે ગ્રહગતિ સમાવેશવશગાઃ
ક્ષયંભોગાધાન્તિ ક્ષણિકસુખમાતાઃ પુનરયમ્ |
ગુરો યોગો ભોગાદુપચિતિ મહો યાત્યવિતથં
સુખં સૂતે સચ્ચિન્મય મનુગતોડનુગ્રહબલાત્ || || ૨૩૩||

પ્રારબ્ધં દૃઢબન્ધનં યદિ ભવે જ્જન્મા ન્યસઙ્ખ્યાનિ તા-

ન્યભ્યસ્તાનિ ભવન્તુ નામ ન વયં મન્યામહે શ્રી ગુરો |
વત્સાન્ ગૌરિવ ભક્ત વત્સલ | કૃપાપાથોનિધે | ત્વત્કૃત -
પ્રાણાન્ સ્ત્વં હ્યનુસૃત્ય ખિદ્યસિ યતસ્તેનૈવ દૂયામહે || ||૨૩૪ ||

ખેદઃ કસ્તવ વારિચાલનવશા ત્કિં ચાલનં ભાસ્વતઃ
સમ્ભાવ્યં તદતત્ત્વ દૃગ્વિલસનાદુક્તં પ્રભો ક્ષમ્યતામ્ |
નો વાચઃ પ્રસરન્તિ સંવિદિ વિભૌ સ્વાર્થૈઃ પરાર્થે ત્વયી
ત્યેત જ્જલ્પનમેવ મે તદપિ મે વાક્છુદ્ધયે કલ્પ્યતામ્ || || ૨૩૫ ||

આત્મીયં કુરુતે યતઃ પ્રભુરિદં સ્વસ્થં સમસ્તં જગત્
સ્વાત્માનં મનુતે જનં સ હિ જન સ્તેનાત્મવાન્ રાજતે |
આત્માર્થં તનુતે વચ સ્તદપિ ન સ્સાર્થં તતસ્ત્વાં વિભું
કિં વા કર્તુમકર્તુ મન્યવિધિના કર્તું તટસ્થં નુમઃ || ||૨૩૬||

કતિ કતિ ન સન્તિ પુરુષાઃ કતિ કતિ વા સ્યુઃ સ્ત્રિય સ્તથા પૂજ્યાઃ |
દ્વન્દ્વં કિ મસ્તિ તાદૃક્ ય દ્વન્દ્વં ત્વામસૂત નિર્દ્વન્દ્વમ્ || ||૨૩૭||

કતિ કતિ શિક્ષાગુરવઃ કતિ કતિ નૌપાધિકા સ્તથાગુરવઃ |
ગૌરવમિહાઽસ્તિ કિં તદ્ગુરુલઘુ સમભાવ ગૌરવં ત્વયીવ ||||૨૩૮||

કતિ કતિ ન સન્તિ જીવાઃ કતિ કતિ વા જગતિ ન સ્યુરીશાશ્ચ |
ઐક્યં કિમસ્તિ તેષાં યત્ ત્વદ્ભાવેવઽઽલોક્યતે સ્વૈક્યમ્ || ||૨૩૯||

કિમય મસમ્ભાષ્ય સ્તે ભાષ્યમહાવાક્યરત્નભૂષ્યસ્ય |
કિમય મસમ્પ્રેષ્યસ્તે પ્રેષ્યસુરેન્દ્રાદ્યધૃષ્યશિષ્યસ્ય || ||૨૪૦||

સ્પન્દન માધરમપિ તે સુન્દર સન્દર્શયિતુ મનાસ્થ સ્ત્વમ્ |
ચન્દન શીતલ મપિ તે મન્દસ્મિત મિન્દુધર કુતો ન મયિ |||| ૨૪૧||

વન્દનમપિ બૃન્દારક વન્દિત કિમુ મેં ન રોચતે કિમુ તે |
નિન્દિતમપહર મત્કૃત માન્દોલન મપનયાન્તરઙ્ગીણમ્ || || ૨૪૨ ||

કર્તવ્યં બહુ મે ભુવિ, વક્તવ્યં ભાસતે ચ બહુધા મે |
મન્તવ્યં હર બહુ મે હર તવ્યપ્રત્યયૈક વૃત્તિં તામ્ || ||૨૪૩||

વચનીયં બહુ મે ત્વયિ, રચનીયં સ્ફુરતુ સર્વદા ત્વયિ મેં
મનનીયં ચાસ્તુ યતો નિર્વૃત્તિ ત્રિકરણં ભવેન્નિભૃતમ્ || || ૨૪૪ ||

# ૧૩. શ્રી પાદુકાતરઙ્ગઃ

મૂલાધારે સ્વપિતિ કુહરે પન્નગી કાઽપિ બુદ્ધ્વા
સ્વાધિષ્ઠાન પ્રભૃતિ પદવી મુન્મુખી સન્નિપત્ય |
પત્યુ સ્સાક્ષા ચ્છિવ તવ પદે શ્રીસહસ્રાર પદ્મે
સંવિત્સારાં વમતિ પરમાનન્દ મારન્દધારામ્ || ||૨૪૫||

મન્દાર સ્તબકાયિતં શિરસિ નઃ કાશ્મીર મુદ્રાયિતં
વિસ્મેરારુણ વારિજાયિત મહો વિદ્યુત્પ્રદીપાયિતમ્ |
શૂન્યેઽન્તર્દહરે પુન શ્રુતિ શિરઃકોટીરરત્નાયિતં
વન્દે શ્રીચરણં ગુરોઃ કિસલય પ્રસ્પર્ધિ રાગાયિતમ્ || || ૨૪૬ ||

કૃત પ્રારમ્ભા સ્તે સકલ મતભેદા ગુરુપદાન્-
મતાનાં સર્વેષામુપરિ ચરણં તસ્ય નિહિતમ્ |
અતોઽનાદ્યન્તં ત ત્સકલ જગતા માદિ પરમં
ભજે શાન્ત્યૈ સાક્ષાદમતમરજસ્કં ગુરુપદમ્ || ||૨૪૭||

શ્રીમત્ત્વદીયચરણં કરુણારસાબ્ધિં
ભાગ્યાવધિં પ્રણત સેવધિ માશ્રયામિ |
યત્કણ્ઠ રત્નમિવ વિસ્મૃત માત્મવસ્તુ
લબ્ધં ભવત્યવનતે મયિ યત્પ્રસિદ્ધમ્ || ||૨૪૮||

ચિત્તં ત્વદઙ્ઘ્રિ કમલા શ્રયલબ્ધ બોધ-
મારન્દ માધુકરવૃત્તિ મુપેત્ય ચિત્રમ્ |
સદ્બ્રહ્મચર્ય મવલમ્બ્ય તતો નિરસ્ત
તાપં મમાવિશતિ ચાશ્રમ માશ્રમં વઃ || ||૨૪૯||

કદા વા સ્પ્રક્ષ્યે શ્રી ચરણ ચરણં દીનશરણં
કદા વા દ્રક્ષ્યે શ્રી વદનકમલં બોધ વિમલમ્ |
કદા વા યક્ષ્યે શ્રી ભજન યજનં મુક્તિ સૃજનં
કદા વા સર્વસ્વાર્પણ પરમપુણ્યં ત્વયિ ભજે || ||૨૫૦||

કદા વાઽસ્મત્ ક્ષેમ પ્રસવ પરતન્ત્રે ત્વયિ રમે
કદા વા નિર્ધૂત પ્રબલ વિપદં તે પદમયે |
કદા વોન્મજ્જેયં મધુપ ઇવ તેઽઙ્ઘ્રિકમલ-
સ્ફુરદ્બ્રહ્માનન્દ પ્રચુર મકરન્દ શ્રુતિઝરીમ્ |||| ૨૫૧ ||

શૈવં શાક્ત મથાઽપિ વૈષ્ણવમિતિ પ્રસ્થાન ભેદેષુ તે
વૈરં યાન્તુ પરસ્પરં વિવદને પ્રૌઢા સ્તથા રાજસાઃ |
અસ્માકં ગુરુપાદપઙ્કજરજઃ પુઞ્જેષ્વલં ક્રીડતાં
બાલાના મવલમ્બનં ભવતુ તત્સૈધ્દં મતં સમ્મતમ્ || ||૨૫૨||

છાયાયાઃ પર માતપોઽસ્ય દિનકૃ છૈરણ્યગર્ભં મહ
શ્ચાપોઽન્તં પુનરસ્ય કોઽપ્યભિમતો હેતુશ્ચ નિર્હેતુકઃ |
ભ્રાન્તાઃ સ્થૂલદૃશોઽનિદાનમતયશ્છાયા ધુપાસ્યાન્તરં
શિષ્ટાસ્તેઽપિ પરં મહો ગુરુપદં સ્વાસ્થ્યં યયુ સ્સર્વતઃ |||| ૨૫૩ ||

હરિહર સમુપાસ્તા વાક્ષરી કાઽપિ શાબ્દી
કલયતિ ચ તથાર્થી ભાવના દ્વૈત સિધ્દિમ્ |
ગુરુપદ મત એકં ન શ્શરણ્યે શરણ્યં
ગલિત સકલભેદે કેવલાદ્વૈતબોધ |||| ૨૫૪||

હરિહરયો સ્સ્વરતો યત એવં સ્ફુરતિ પરાપર ભેદ વિવાદઃ |

ગુરુપદ તસ્તદ્દુદસ્ત ઇતીદં તદભયદં પદમેત દુપાસે || || ૨૫૫ ||

ગુરુપદ સમવાપ્તૌ તદ્વિદુતે ગૌરવં સ્યા-
લઘુપદ સમવાપ્તૌ લાઘવં વા ન ચિત્રમ્ |
લઘુ ભજનમપિ ત્વય્યાત્મલાભે લઘુત્વં
કલયદપિ વિચિત્રં ગૌરવં ચાદધાતિ || ||૨૫૬||

યત્ર વિધિ સ્સનિષેધ મપાસ્તો યત્ર મન સ્સ્વરથં વિજહાતિ |
યત્ર વચો વિરતિં સમુપૈતિ ત્વત્પદ મેવ પદં તદુપાસે || ||૨૫૭||

સુન્દર તવ સુન્દર પદ સન્દર્શન વન્દનાનુસન્ધાન સ્રક્ |
ચન્દન ધારણ લેપન સૌન્દર્યાનન્દ સાર સારં યાચે || || ૨૫૮||

તવચરણં શરણં મમ તવ વચનં મધુ રસાયનં મયિ તપ્તે |
તવ હૃદયં સદયં મયિ ભવતુ મુદાં જ્ઞાન સમ્પદા મુદયાય || || ૨૫૯||

શરણં ભવ ભવ જલધે સ્તરણં કુરુ મે સ્વરૂપ ચિવૃત્તેઃ |
સ્ફુરણં દેહિ શરણ્યં ચરણં મે શિરસિ સંવિધેહિ દયાબ્ધે || ||૨૬૦||

શરણાગત ધિષણામૃત કિરણં દ્યુતિમસૃણં
વરણાયિત કરુણારસ વરુણાલય મરુણમ્ |
સ્ફુરણાદનુસરણાદનુરમણાદઘહરણં
શરણં ગુરુચરણં મમ તરણે સ્વવિતરણે ||||૨૬૧||

# શિશુગીતપ્રારમ્ભઃ

જયતિ તેડધિકં જન્મના જગત્
શ્રિય ઉપાશ્રયં ચિદ્રસોદયમ્ |
ભયનિરાસકં ભદ્રદં યત
સ્સ્વય મિહાડઙ્કિતં ત્વત્પદામ્બુજમ્ || ||૨૬૨||

પરમ યા સુતં ત્વામસૂતયા
વરયતે મુહુ સ્ત્વાં તપોરમા |
ધરણિ મણ્ડલં તત્પદામ્બુજ
ચ્છુરિતરેણુના સુષ્ઠુ શોભનમ્ ||||૨૬૩||

ન ખલુ કેવલં નાથ | ના ભવાન્
સુખમયં વપુ શ્શુદ્ધચિન્મયમ્ |
સખ | ઉદેયિવાન્ સાધુરક્ષણે
હ્યખિલદેહિનામન્તરાત્મદૃક્ || ||૨૬૪||

ત્રિપુરસુન્દરી દેવતા ભવાન્
ત્રિપુરવૈરિણિઃ શ્રીકલાડસિ નઃ |
તપ ઉપાસનં તત્ત્વચિન્તનં
સુપરિપાકત શ્શોભનં ત્વયા || ||૨૬૫||

ત્વમસિ તત્ પરં બ્રહ્મ નઃ પરં
ત્વમવિનાકૃતા તત્ત્વત સ્તતઃ |
સમયિનાં પરાશક્તિરીશ્વરી
ત્વમસિ નઃ પ્રસૂઃ સ્તન્યપાયિનામ્ || ||૨૬૬||

કલિરયં ખલઃ કાલ ઇત્યલં
કલુષિતં મનઃ ક્લાન્તિ મૃચ્છતિ |
કલિહરો ભવાન્ કાલ કાલ
ઇત્યલઘુ વીક્ષ્ય તદ્ભ્રાન્તિ મુજ્ઝતિ ||||૨૬૭||

શરણમાગતા સ્સત્ય મક્ષયં
ચરણમદ્ય તે ચારુલક્ષણમ્ |
સ્ફુરણ મઙ્ગલં પૂર્ણભાવદં
કરુણયાઽધે નઃ કાન્ત દર્શિતમ્ ||||૨૬૮||

શમનકિઙ્કરાત્ સંસૃતેર્જ્વરાત્
વિમત ધર્ષણાદ્વિશ્વતોઽનયાત્ |
સુમનસાં પતે ક્ષુત્તૃષાદિતઃ
રમણ તે મુહુઃ રક્ષિતા વયમ્ |||| ૨૬૯||

ઉષસિ બોધયસ્યુત્થિતો બહિ
ષમ ભૂતલે વીક્ષ્ય ન શ્શયે |
સુષમયા સ્વયં શોભમાનયા
ઋષિરિવારુણ શ્રીનિકેતનઃ || ||૨૭૦||

વિરહવિહ્વલાન્ વીક્ષ્ય ન શ્શ્રમાત્
ચરણમાગતાન્ સૌમ્ય લાલને |
ત્વરિત મીશ્વરં ત્વાં હિ પશ્યતાં
તરલિતં મનઃ તર્પિતં ચ નઃ ||||૨૭૧||

વિરસમાત્મનઃ પ્રેષ્ય નો ગૃહાન્

ચરસિ નઃપુર સ્સર્વગોચરઃ |
કરુણયા મુહુઃ કમ્પિતસ્ય
તે ગુરુરિતિ પ્રથા કૂટકલ્પના ||||૨૭૨||

કરતલેઽશનં ક્ષ્માતલે શયં
ચિરતરસ્મૃતિં ચિત્સુખાકૃતિમ્ |
પરશિવે રતિં પ્રાભવેઽચ્યુતિં
વિરતિ મીક્ષ્ય તે વિસ્મિતા વયમ્ ||||૨૭૩||

તરુતલે વસન્ તત્ત્વમુદ્રયા
પરમ મૌનતઃ બ્રહ્મ બોધયન્ |
ચિરનિરૂઢસચ્ચિત્સુખામ્બુધિઃ
સ્ફુરસિ દક્ષિણામૂર્તિરેવ સન્ || ||૨૭૪ ||

સ્મિત મુદેતિ યત્ શ્રીમુખામ્બુજાત્
વિતનુતે દૃશામદ્ભુતીં શ્રિયમ્ |
નત જનાર્તિ હન્ નર્મતે વચ-
શ્શ્રિતજનૈક સઞ્જીવનૌષધમ્ || ||૨૭૫||

અપરિતૃપ્તિતો વ્યાકુલા વયં
નિપુણમપ્યહો નીરસં મનઃ |
ગ્લપયતિ શ્રિયં કાન્ત તત્સ્વયં
ક્ષપય નઃ પરં જાડ્યમાન્તરમ્ || ||૨૭૬||

સુતપસા શ્રુતાત્ સૂનૃતાદ્ વ્રતાત્
સતત ભક્તિત સ્સાધુયોગતઃ |
ન તનુધીવચો નાયકા વયં

ન તદુપેક્ષણં ન સ્તવોચિતમ્ ||||૨૭૭||

રહસિ દર્શનં રાગકર્શનં
વિહરણં ચ તે વિશ્વમણ્ડલમ્ |
મહસિ વર્તનમ્ મન્ત્ર ગોપનં
મુહુરુદીક્ષ્ય સમ્મોહિતા વયમ્ ||||૨૭૮||

યદણિમાદિભિ વ્યંક્ત મૈશ્વરં
પદમવેક્ષ્ય તે પાદ માગતાઃ |
ઉદર મન્તરે યુઞ્જત શિશૂન્
સદય નઃ પશૂન્ સાધુ પાલય ||||૨૭૯||

દૃગસિ દ્રષ્ટતા દૃશ્યતા ચ તે
નિગમવલ્લકી નિસ્સૃતો ધ્વનિઃ |
સગુણ મેકદા સ્તૌતિ નિર્ગુણં
ક્વગતિરીશ્વરે વાક્તતે શિશોઃ || ||૨૮૦||

રક્તારવિન્દ સુભગં શ્રુતિમૌલિપુષ્પં
સ્પ્રષ્ટું દૃશાऽપિ ચરણં તવ નાથ દૂયે |
યાત્રાં ચ તેન ચરસિ વ્યથતે ન કિંસ્વિ-
ધત્રાન્તરે ભ્રમતિ ધી ભવદાયુષાં નઃ ||||૨૮૧ ||

યત્તે સુજાત ચરણામ્બુરુહં સ્તનેષુ
ભીતા શ્શનૈઃ પ્રિય દધીમહિ કર્કશેષુ |
તે નાટવી મટસિ તદ્વ્યથતે ન કિંસ્વિ-
ધત્રાન્તરે ભ્રમતિ ધી ભવદાયુષાં નઃ || ||૨૮૨||

# વિનયાધાનમ્

વાચા મગોચર ભવન્ત મનન્વિતાનાં
વાચાં કરોમિ વિષયં મનસા પ્યગમ્યમ્ |
રમ્યં તવૈવ ચરણં શરણં પ્રપદ્યે
ત્રાયસ્વ મામથ સહસ્વ મમાપરાધાન્ || ||૨૮૩||

ત્વમેવ પ્રત્યક્ષં કિમિહ બહુના વેદ વિદિતં
પરં બ્રહ્માસીતિ સ્ફુટમવગતં સિદ્ધવચનમ્ |
ન ચેદેવં ભક્ત ત્રિદિશલતિકા શ્રીગુણનિકા
કથં વાગ્ગુભેડસ્મિન્ ભવતિ ચતુરા ભાવમધુરા || || ૨૮૪||

આબાલ્યા ત્સમધિગતં યત્ત ત્સર્વં સમર્પયે બાલ્યાત્ |
લૌલ્યા દ્ધશસિ મમેદં માલ્યં ભૂયાદ્ધ્યસ્તવામૂલ્યમ્ || || ૨૮૫||

પ્રત્યક્ષં પ્રત્યક્ષર મદ્રાક્ષં દ્રાક્ષયા દૃક્ષરસં તે
અક્ષીણેન કટાક્ષેણાક્ષિપ્તં પદ મનુક્ષણ ક્ષણમસ્મિન્ || || ૨૮૬ ||

મનસ્સમુજ્જૃમ્ભણ મન્વનન્વયં
વચઃ પ્રવાહસ્ય વિજૃમ્ભણં મમ |
નિલીય સંવિત્કલશાર્ણવે ગુરૌ
ત્વયીદમન્ત સ્તિમિતં ભવિષ્યતિ ||||૨૮૭||

# અનુસન્ધાનમ્

અનિષેધે નિષેધે ચ યદસૂ ધાત્વર્થ ગોચરમ્ |
જ્ઞાનં તદવ્યયં બિન્દુસ્થાનીયં ત્વામુપાસ્મહે ||||૨૮૮||

કામાનામીશ્વરેણૈક્યં ગતાં ત્રિપુરસુન્દરીમ્ |
તદીશ્વરીં પરાનન્દઝરીં તાં ત્વામુપાસ્મહે || ||૨૮૯||

શ્રીં હ્રીં ક્લીં બીજરૂપાં તામોઙ્કારાર્થ સ્વરૂપિણીમ્ |
શેખરીભૂત સોમાર્ધાં મામુમાં ત્વામુપાસ્મહે || ||૨૯૦||

વીણા શ્રુત્યન્ત નાદાન્ત શાન્ત તન્માત્ર માતૃકામ્ |
કાન્તાખિલદિગન્તાં તાં પરાન્તાં ત્વામુપાસ્મહે ||||૨૯૧||

આદ્યાહન્તાવૃત્તિ માત્રાં પૂર્ણાહમ્ભાવ ભાવુકામ્ |
અવિદ્યાં બ્રહ્મવિદ્યાં ત્વામાદ્યાં વિદ્યામુપાસ્મહે ||||૨૯૨||

એકા દ્યનન્તસઙ્ખ્યાન્ત બૈન્દવાસ્થાન મણ્ડપામ્ |
પૂર્ણાઙ્કાં ત્વાં શિવાઙ્કસ્થાં મહારાજ્ઞીમુપાસ્મહે ||||૨૯૩||

વેદાગમ શિશુક્રીડા વિનોદરસિકાં શિવામ્ |
ઉપચાર કલોપાસ્યાં સ્મિતાસ્યાં ત્વામુપાસ્મહે || ||૨૯૪||

સચ્ચિત્સુખનિધાનાપ્તિ હેતુકાં પાદુકાં પરામ્ |
જરામરણવિધ્વંસિ ઘુટિકાં ત્વા મુપાસ્મહે || ||૨૯૫||

શ્રીપાદુકા મહામન્ત્રસૌધ શૃઙ્તારનાયિકામ્ |
ચતુશ્શ્રુતિ મહાવાક્ય ભૂમિકાં ત્વામુપાસ્મહે || |૨૯૬||

સંસારતીવ્રાતપતાપિતાનાં
શુષ્કીભવદ્દ્વન્મુખ પુષ્કરાણાં
છાયા યતસ્સ્યાદમૃતસ્ય ધારા
તસ્યૈ નમ શ્શ્રીગુરુપાદુકાયે |||૨૯૭||

જહિ જહિ ત્વમજાં સ્વબિભીષિકાં
કુરુ કટાક્ષમયી મપિ કુઞ્ચિકામ્ |
વિઘટય પ્રિય હૃન્મણિ પેટિકાં
ઘટય મેઽત્ર ચ તે મણિપાદુકામ્ |||| ૨૯૮||

શ્રી શ્રી શ્રી ત્રિપુરામ્બિકા તુહિનરુગ્રેખા કિરીટાત્મક
શ્રી શ્રી શ્રી જગદેકદેશિકવર શ્રીશઙ્કરસ્થાપિત |
શ્રી શ્રી શ્રી યુત કામકોટિ વિલસત્સિંહાસનાધિષ્ઠિત
શ્રી શ્રી શ્રી ગુરુરાજરાજમકુટ શ્રીપાદુકાયૈ નમઃ || ||૨૯૯||

કાઞ્ચ્યાં શ્રીમણિકિઙ્કિણી કિણિકિણિ ક્વાણાઞ્ચિતાં કાઞ્ચનીં
કામાક્ષી કટિમણ્ડલોપરિ લસત્કાઞ્ચીં વિપઞ્ચીં ગિરાં
લક્ષીકૃત્ય ગુરો ર્વચઃ પરિણત પ્રત્યક્ષર પ્રસ્રવદ્-
દ્રાક્ષેક્ષુ સ્વરસાનુભૂતિમમલામાલમ્બ્ય સાક્ષાન્મયા || ||૩૦૦||

ધારાક્ષાન્ત સુવર્ણરત્નઘટિતા સેયં સ્તુતિ શ્શ્રીગુરોઃ
અદ્વૈતાગમરાજ્યરઞ્જન યશઃ પૂર્ણાભિષેકોત્સવે |
સ્વર્ણોદીર્ણ મહાસવે પરશિવાભ્યર્ણાયિત પ્રાભવે

ક્લુપ્તેયા ચ્છશિમૌલિ મૌલિવિલુઠન્મન્દાકિની સૌહૃદમ્ ||||૩૦૧||

પ્રથિત હેમવલમ્બિ મહોત્સવેઽભ્યુદિત પૂર્ણરસામૃત નિર્ઝરી |
જનિ મૃતિ વ્યસન પ્રતિજિત્વરી ગુરુકૃપાલહરી જયતેતરામ્ || ||૩૦૨||

"ગુરુકૃપાલહરી દિશતાચ્છ્રિયમ્ ||"
શ્રીઃ શ્રીઃ શ્રીઃ શ્રીઃ શ્રીઃ